संस्कृतपरिषद् ग्रन्थावली-१७०

In Public domain. Digitization Muthulakshmi Research Academy

# क्षेमेन्द्रस्य साहित्यसौरभम्



सम्पादकः
डा. वि. श्रीनिवासशर्मा
प्रधानसम्पादकः
डा. श्रीनिवासवरखेडी
निदेशकः

संस्कृतपरिषद्
राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था
उस्मानियाविश्वविद्यालयः, हैदराबाद्
२०१०

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृतपरिषद् ग्रन्थावली - ७०

# क्षेमेन्द्रस्य साहित्यसौरभम्

( द्विदिवसीयराष्ट्रियसंगोष्ठ्यां समर्पितपत्राणां संकलनम् )

सम्पादकः

डा. वि. श्रीनिवासशर्मा

प्रधानसम्पादकः

डा. श्रीनिवासवरखेडी

निदेशकः

संस्कृतपरिषद्

आदर्शशोधसंस्थानम्

उस्मानियाविश्वविद्यालयः

हैदराबाद - ५०० ००७

२०१०

In Public domain. Digitization Muthulakshmi Research Academy

ग्रन्थोऽयं भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनस्य राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य द्रव्यानुदानेन प्रकाशितः ।

ISBN NO 978-93-80171-06-7

प्रधानसम्पादकः - **निदेशकः संस्कृतपरिषद्**

ग्रन्थप्रकाशनसंयोजकः - **सम्पादकः संस्कृतपरिषद्**

© सर्वेऽधिकाराः संस्कृतपरिषदायत्ताः

प्रथमं मुद्रणम् - २०१०

प्रतयः - ३००

मूल्यम् - रूप्यकानि. १००-००

पुस्तकप्राप्तिस्थानम् : **संस्कृतपरिषद्**
आदर्शशोधसंस्थानम्
उस्मानियाविश्वविद्यालयः
हैदराबाद् - ५०० ००७
दूरवाणी - ०४० - २७०७०२८१
Email:sanskritacademyhyd@gmail.com

मुद्रणालयः - आर्.के.मुद्रणालयः
बजार्घाट्, नांपल्ली,
हैदराबाद्

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series - 70

# Kshemendra Sahitya Saurabham

## (The Procedings of Two-Day National Seminar on Kshemendra's contribution to Sanskrit Literature)

Editor
**Dr. V. Srinivasa Sharma**

General Editor
**Dr. Srinivasa Varakhedi**
Director

**SANSKRIT ACADEMY**
**(Adarsh Shodh Sansthan under Rashtriya Sanskrit Sansthan)**
**Osmania University**
**Hyderabad - 500 007**
**2010**

In Public domain. Digitization Muthulakshmi Research Academy

This book has been brought out with the financial assistance of Rashtriya Sanskrit Sansthan, Ministry of Human Resource Development, Govt. of India, New Delhi.

ISBN NO 978-93-80171-06-7

Publisher General Editor : The Director Sanskrit Academy
Co-ordinator : Editor

© copy rights Reserved
First Edition - 2010
Copies : 300

Price : Rs.100/-

Copies can be had from : SANSKRIT ACADEMY
(Adarsh Shodh Sansthan)
Osmania University
Hyderabad - 500 007
Phone No : 040 - 27070281

Email:sanskritacademyhyd@gmail.com

D.T.P.
Chinnam.Bhagyalakshmi, Hyderabad

Printers : R,K. Printers
Bazarghat, Nampally
Hyderabad

In Public domain. Digitization Muthulakshmi Research Academy

## Preface

In April 2009, Sanskrit Academy organized a National Seminar on "Ksemendra's contribution to Sanskrit Literature" while brining out its pride publication – Kshemendra's minor works (revised edition). Many eminent scholars participated and presented valuable papers in the seminar. The present publication "Ksemendra-sahitya-sauṛabham" is the collection of those papers.

This introduction will help the readers to get the complete idea about the works of Ksemendra.

*Ksemendra* – A pride of India .

Kashmir state produced hundreds of great thinkers, poets, scholars and writers who are responsible for the richness of Indian knowledge systems in many aspects. Since very early times, Kashmir has been called "*Saarada Desa*" - the Land of Goddess *Saraswati*. Kashmir's contribution to the Indian thought has been of immense artistic, esoteric and aesthetic value. In the field of poetry great Savants of Kashmir gained respect not only in Kashmir but also outside as well. Their contributions stand unparallel for all times in the history of Indian literature. *Mammata*'s *'Kaavya Prakaasha'*, *Abhinavagupta*'s "*Lochana*" commentary of *Dhvanyaloka*, and many other prominent works are still considered as the most authentic and authoritative works on poetics in the whole gamut of Sanskrit literature. *Vamana, Vagbhata, Abhinavagupta, Mammata, Rudrata, Ruyyaka, Udbhata, Kalhana, Utpala, Bilhana* and so on are a few to name in the galaxy of Sanskrit polymath writers. Such a list of Kashmirian stalwarts of great eminence catalogues a poet and critic par excellence - *Ksemendra*.

In Public domain. Digitization Muthulakshmi Research Academy

*Ksemendra*, who is one of the front-ranking writers, flourished in the last quarter of tenth and first half of the eleventh century AD. Endowed with a master mind, he had a variety of interests and wrote quite a number of treatises on diverse subjects. He is truly described as a polymath. Almost every important branch of Sanskrit literature has been enriched by this genius writer. He was not only a contemporary of the great Acharya *Abhinava Gupta*, but also was his close associate as one of his disciples. *Ksemendra* himself acknowledges to have been instructed in '*Alankara Shastra*', by this great Acharya. He lived during the reign of the King *Ananta* and his successor King *Kalasa* of Kashmir emperor dynasty.

*Ksemendra*'s works and literary activities are spread over many diverse fields. He has summarised the great epics – the Ramayana and the Mahabharata. He is responsible for the survival of '*Buihat-kathaa*' of *Gunadhya* originally authored in *Paishachi* language through his Sanskrit work – *Bruhat-kathaa-manjarii*. He also wrote many works on Buddhism. In '*Baudhaavandaana Kalpalataa*' he compiled *Jaataka* tales. This work is a collection of 107 chapters (Pallavas). This work is still considered as an important work by Buddhists. His work '*Kalaavilaasa*' makes *Ksemendra* a poet of different class and calibre in the field of arts. He has recorded *Parihaasa* (jokes) to depict the various characters of his times in his work '*Narma-Maala*'. From the fertile pen of *Ksemendra* has come up an interesting work '*Samaya-Maatrika*', which deals with the social life of his time. He wrote another work '*Aucitya-Vicaara-carchaa*' which is a work on propriety of a literary piece. The author was bestowed upon with a great sense of history. He authored a historical poem "*Raajavali*", which is referred by *Kalhana* in his *Rajatarangini*. After reading his works one is able to know everything about the period he lived in. He has preserved some thing novel and

In Public domain. Digitization Muthulakshmi Research Academy

precious for us which would have been wiped out otherwise. In a way *Kshemendra* was a bright poet and historian of *Kashmir*, who was aware and vibrant about happenings in the society. He was a perfectionist, who with his immense talents, wrote on diverse subjects with equal authority and finesse. More than forty works are accredited to him; some of them still remain in the dark.

*Ksemendra*'s life sketch

Unlike other Indian poets, *Ksemendra* has left some important information about his personal life, ancestors the dates of the composition of some of his works etc., in his works viz., *Ramayanamanjari*, *Bharatamanjari*, *Kavikanthabharana, Auchityavicaracarca and Dasavataracaritam*. *Ksemendra*'s son *Somendra* has also thrown some light on his father's life. In consultation with these sources, historians have come to a conclusion that he was son of *Prakasendra*, grandson of *Sindhu* and great-grandson of *Bhogindra*, who belonged to a Brahmin family that enjoyed a good status in Kashmir by possessing esteemed position of Minister to the King. *Narendra*, it was reported by *Ksemendra* himself, one of his forefathers served as Minister to King *Jayaapiida*. Both *Bhogindra* and *Sindhu* were described by *Somendra* as having immense wealth and fame. *Prakashendra*, *Ksemendra*'s father, according to the accounts of his son and grandson, is a magnificent personality. He had enormous wealth ; he performed many *Yajnas* ; he made very generous charities ; he spent a lot on *Deva-kaarya* (rituals). He was a follower of *Saivism*. He was a scholar too. Thus we get a very clear picture about the lifestyle and status of *Ksemendra*'s family from the concluding verses of *Ksemendra*'s works. From his own statements *Ksemendra* makes it clear that he hails from a wealthy and scholarly family that was well known in Kashmir.

In Public domain. Digitization Muthulakshmi Research Academy

He studied under many Gurus i.e, teachers. *Abhinavagupta*, a prolific writer of literary criticism was his Guru. *Ksemendra* studied '*Sahityashastram*' under him in his *Gurukula*, where more than twelve hundred students were reported to have studied. It becomes very clear from *Ksemendra*'s writings that *Abhinavagupta* had a great influence on *Ksemendra* in order to build his character and interest in his literary activities.

In his *Aucitya-vicaara-carcaa, Ksemendra* mentions another name "*Gangaka*" as his teacher. He also quotes a verse from the poem of *Gangakopadhyaya* in his *Aucitya-vicaara-carcaa*. Unfortunately neither he mentioned the source and nor any work of *Gangaka* is available to us.

*Ksemendra*'s forefathers belonged to *Saivism*. With that background *Ksemendra* was brought up as a follower of *Saivism* belief. However, in later days he himself accepted *Vaishnavism* and became a *Vaishnava* after coming in contact with *Acharya Somapada*. *Ksemendra* obtained *Vaishnava-deekshaa* from *Acharya Somapada*, whom he praised as his mentor and initiator.

In his introduction to the *Avadanakalpalata, Ksemendra*'s son *Somendra* mentions the name of *Ksemendra*'s another teacher – *Viryabhadra*, who was a contemporary scholar in Buddhist Philosophy. It is reported that *Viryabhadra* helped *Ksemendra* a lot in preparing compilation of *Avadaana* stories, which required a sound understanding of Buddhist ideology. Thus, *Ksemendra* seems to have gathered information about Buddhist Philosophy and tradition from *Viryabhadra*.

With this information we may conclude that *Ksemendra* had earned specialization in many Shastras studying with many famous and brilliant scholars well versed in different shastras.

In Public domain. Digitization Muthulakshmi Research Academy

*Ksemendra*'s date and literary career

Nothing is definitely known about the date/year of birth of *Ksemendra*. It is presumed by many historians with the help of available resources that he was actively engaged in literary activities during the regime of the King *Ananta Raja*, who ruled Kashmir from 1028 to 1063 AD. He continued his activities during the period of the King *Kalasa* (1063-1089 AD) also. On the basis of evidences available, historians roughly concluded that his period of literary activity was spread for about five decades falling between 1015 AD and1066 AD. He completed his *Bruhat-kathaa-manjari* in 1037 AD, *Samayamaatrika* in 1050 AD, *Avadaanakalpalataa* in 1052 AD, *Aucitya-vicaara-carcaa* in 1061 AD, and lastly *Dasaavataaracaritam* in 1066 AD. Hence, it may be determined that he lived between 1000 and 1070 AD.

*Ksemendra* as a Satirist and a Socialist

Satire is a composition, in which is employed sarcasm, or irony, ridicule in denouncing exposing or deriding vice, folly, foibles, or evils of any kind; it is a lampoon on individuals for the ostensible purpose of exposing and discouraging vice or folly. Satire has been deftly utilised by three well-known writers, *Dandin, Somadeva and Ksemendra* in Sanskrit with the pious motive of reforming the administrative machinery and the degenerating anti-social elements in the country.

*Ksemendra* used political and social satire effectively. Of his works, *Kalaavilaasa, Darpadalana, Desopadesa, Narmamaalaa and Samayamaatrikaa* are replete with poignant satire.

In Public domain. Digitization Muthulakshmi Research Academy

The motive of the poet in composing these works is edification rather than entertainment. He states more than once that 'his satire is not merely for the sake of satire, but for the sake of social reform and cultural regeneration.' At the commencement and conclusion of *Desopadesa, Ksemendra* begs to be pardoned for using uncivil or impolite language on his part or because of his fault-finding nature, but because of his earnest anxiety to see that the people disentangle themselves from unlawful occupations, ignoble manners and anti-social customs. He was quite aware of the utility of humour, rather than the satirical or sarcastic language in imparting discipline in morals to raw youths with hot blood. *Ksemendra* saw around him in Kashmir the depraved condition of society and he was urged with a keen desire to reclaim it according to his lights. With this end in view he utilised sarcastic ridicule or satire of men, manners, customs and occupations. Endowed with an eagle-eye he could easily detect the malady under (with) which the society was ailing. He was not a misanthrope and his criticism or satire was not altogether destructive. He detected hypocrisy, sham and loopholes in society. He brings them out prominently and ridicules them.

*Ksemendra's Caarucaryaa Caturvargasangraha*, Canto X of the *Kalaavilaasa* and *Sevyasevakopadesa* may be perused for the remedies prescribed by *Ksemendra* to purge the society of its evils or ailments.

Some of the works of *Ksemendra* are replete with graphic caricatures of an extensive cross-section of the society around him. He was endowed with a rare and comprehensive social out-look (vision) which discloses his intimate contact with the people all and sundry. Hence his vivid 'depiction of the multifarious facts' of the contemporary society in Kashmir is both precise and effective e.g. "The unscrupulous bungling of the *Kayastha* bureaucracy, the sad

In Public domain. Digitization Muthulakshmi Research Academy

plight of the common folk, the clever pranks of a grabbling money-lender; the unrelenting malevolence of a close fisted hoarder; the peevish arrogance of an upstart scholar, the voluptuous ventures of a misguided student, the ludicrous hankering of a senile husband; the ostentatious piety of an orthodox Brahman; the facile credulity of a victim of medical, literary and musical quacks and others like the hook winking astrologer. The *Kayastha*, in various forms, held the Kashmir of his day in the grip and vitiated the social life into a sordid existence. The Merciless exploitation to which the common people were subjected by this all-devouring tyrant must have been appalling, indeed, and *Ksemendra* effectively voiced the injured feelings of his age in his spirited verse.

*Vyasadaasa* – *Ksemendra*'s title

From his works we learn that he had had a unique title "*Vyaasadaasa*". He mentions this name in all most all his prominent works. Probably on writing of "*Bhaaratamanjari*", he might have got this title in the scholarly community. He was a very brilliant writer like *Vedavyasa* as is indicated by this title. Hence beyond doubt this title looks meaning full in case of *Ksemendra*.

*Ksemendra*'s Works – a brief account

Though the name of *Ksemendra* was known to historians of Indian literary, his works were not available to the scholars and researchers of Indology till 1870s. 1871 onwards many works got unveiled one by one to modern scholarship by continuous efforts put by several dedicated Indian and Western scholars. According to available sources, he wrote nearly thirty works. Although many of

In Public domain. Digitization Muthulakshmi Research Academy

them (about eighteen) have been published in due course, yet some of them that are known through other works are not available down to us till the date. Ksemendra's works presently available in print can be classified in the following way, out of which some five works are big in size, two are published separately (the authorship of *Lokaprakasa* & *Nitikalpataru* is in question) and remaining eleven are considered as minor works. (Details are given the introduction to Kshemnedra's minor works published by the Academy – 2009)

Poetical Epitomes:

*1.Bruhat-kathaa-mañjari, 2.Ramayanamañjari (Ramayanakathasara), 3.Bhaaratamañjari, 4.Bodhisattvavadaanakalpalataa* (*Bauddhaavadaanakalpalataa , Bauddhavadaanala(ti)kaa, Avadaanakalpalataa*), 5.*Dasaavataaracaritam.*

Poetics and Metrics:

1.*Kavikanthaabharana,* 2. *Aucityavicaracarca,* 3.*Suvrttatilaka.*

Didactic Poems:

1.*Desopadesa,* 2.*Narmamalaa,* 3.*Carucaryaasataka,* 4.*Caturvargasangraha,* 5.*Samayamatrka,* 6.*Sevyasevakopadesa,* 7.*Kalavilasa,* 8.*Darpadalana.*

Miscellaneous Works (Attributed to Ksemendra):

1.*Lokaprakasa,* 2.*Nitikalpataru.*

In Public domain. Digitization Muthulakshmi Research Academy


## Acknowledgement

This is appropriate to place on the records that the efforts put by Dr. V. Shrinivasa Sharma, Editor with the assistance of other staff of Sanskrit Academy, not only in organizing the seminar as its coordinator, but also in publishing this proceeding. I thank Dr. Sharma for his interest and painstaking work. I also thank the faculty of Sanskrit Dept, OU for their kind association in many ways.

We are grateful to Prof. T. Tiruapati Rao, Honorable Vice Chancellor of Osmania University and Chairman of Managing Committee and other distinguished members for their kind support.

I also remain ever grateful to Professor. Radhavallabh Tripathi ji, Honorable Vice Chancellor of Rashtriya Sanskrit Sansthan University, under Ministry of Human Resource Development, Govt. of India for his constant support in all aspects.

Last but not least, we express thankfulness to the persons who did the job of DTP and printing of this book.

Date 15th Jan 2010 Dr. Shrinivasa Varakhedi
Makara-sankranti Day Director

In Public domain. Digitization Muthulakshmi Research Academy

# Editorial

*The Sanskrit Academy conducted a two-day National Seminar on Kshemendra's contribution to Sanskrit Literature about twenty topics are selected for the seminar in which the Scholars from various state of India have participated.*

*The seminar was inaguarated by the Chief guest Maha* ***mahopadhyaya Acharya P.Sri Ramachandrudu****. The inagural function was presided over by* ***Prof. T.Tirupathi Rao****, Vice-Chancellor, Osmania Univerity,* ***Prof. Radhavallabha Tripathi****, Vice-Chancellor, Rashtriya Sanskrit Sansthan, New Delhi,was guest of honour at inagural Fucntion who have given a scholarly and lively message on the occassion, and keynote address was presented by* ***Prof. S.Sudarshana Sharma****, Vice-Chancellor. S.V. Vedic University, Tirupathi,*

*Many scholars from Andhra Pradesh one from Bangalore, one from Kanchipuram one from Nagpur Maharastra, were instead for the seminar. All the Sanskrit lecturers from various colleges of the twin cities have participated in the deliberations.*

*Although twenty topics were allotted, only the papers, received on time are brought into this book form.*

*I express my thanks to* ***Mahamahopadhyaya Prof. P.Sriramachandrudu*** *for gracing the occasion and giving the blessings.*

*I am thankful to* ***Prof. Radhavallabha Tripathi*** *for his scholarly and lively message at inagural function.*

In Public domain. Digitization Muthulakshmi Research Academy

*I am grateful to **Prof. S.Sudarshan Sharma**, Vice-Chancellor, Sri Venkateswara Vedic University, Tirupati for giving the scholarly keynote address.*

*I am grateful to the authorities of the Osmania University, Hyderabad especially to Vice-chancellor, Prof. **T.Tirupathi Rao**, the Registrar, **Prof. Y.C.Venudhar** and other officials.*

*I am thankful to the authorities of the Rastriya Sanskrit Sansthan, New Delhi, especially the Registrar, **Prof. R. Devanathan**, and other officers for their co-operation.*

*It is also my duty to acknowledge the co-operation extended by our **Director** and other collegues, who have been with me throughout in organising the seminar.*

*I thank all our contributors for their valuable presentations.*

*I hope, this will receive the appreciation of scholars students and lovers of Sanskrit Poets.*

***Dr. Srinivasa Sharma***
*Co-ordinator of the Seminar*

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

# Index


1. क्षेमेन्द्रस्य देशोपदेशात्मवृत्ते — 1 - 10
   आचार्य बी. नरसिंहाचार्यः
2. औचित्यविचारचर्चा - एकं परिशीलनम् — 11 - 19
   आचार्यः कोम्पेल्ल रामसूर्यनारायणः
3. सेव्यसेवकोपदेशः — 20 - 28
   डा. वि.ए.कुमारस्वामी
4. क्षेमेन्द्रस्य नर्ममाला — 29 - 39
   डा. इनगण्टि उमारामारावः
5. समयमातृकानुशीलनम् — 40 - 47
   डा. डी. रामकृष्णः
6. भारतमञ्जरी - राजधर्माः — 48 - 53
   डा.वि.श्रीनिवासशर्मा
7. चारुचर्या — 54 - 60
   डा. ए. प्रभावती देवी
8. क्षेमेन्द्रस्य भारतमञ्जरी — 61 - 68
   डा.जे.एस्.आर्.ए. प्रसादः
9. क्षेमेन्द्रविरचितचतुर्वर्गसंग्रहस्य धर्मप्रशंसा — 69 - 74
   डा. विद्यानन्द आर्यः
10. क्षेमेन्द्रस्य कविकण्ठभरणकाव्यसारः — 75 - 80
   डा. पी.टी.जी.वी.रांगाचार्युल
11. चारुचर्यायाः चारुता — 81 - 87
   डा. जोषी सन्तोषकुमारः
12. भारतमञ्जरी - चरित्रचित्रणम् — 88 - 97
   डा. जि. सूर्यप्रसादः

In Public domain. Digitization Muthulakshmi Research Academy

13. **A Note on Satirical works of Kshemendra with special reference to Kalavilasah** 98 - 111
Prof. S.Ranganath

14. **A critical study of Ksemendra's Des'opades'a** 112 - 121
Prof. W.Prahlada Naidu

15. **The Social, Political, Economic and Religious conditions during 10th to 11th Century A.D. with reference to the works of 'Kshemendra'** 122 - 132
Dr. E.Rajalakshmi

16. **A Critical appreciation of दर्पदलनम् of क्षेमेन्द्र** A lesson of unlearning 133 - 146
Dr. S. Ramadevi

17. **Life and works of Kshemendra** 147 - 158
Dr. B. Vani

18. **कुलश्रुतयोः दर्पमधिकृत्य - किञ्चित्** 159 - 164
Dr. P. Somanath

19. **नारीधर्म in क्षेमेन्द्र's भारतमञ्जरी** 165 - 174
Jyoti.N.Fouzdar [Jyotikala.N]

**List of Contributors** 175 - 176

In Public domain. Digitization Muthulakshmi Research Academy

# १. क्षेमेन्द्रस्य देशोपदेशात्मवृत्ते

आचार्य बी. नरसिंहाचार्यः

श्रीमद्धर्मपुरीशं च नारसिंहं मम प्रभुम् ।
प्रणम्य पितरौ पूज्यौ विद्याबुद्धिप्रदान् गुरून् ॥
क्षेमेन्द्रस्य कवीन्द्रस्य कृतीन्द्रस्य महात्मनः ।
कृतिद्वयं समीक्ष्याहं वदिष्यामि यथामति ॥

'' नूनं जगति सर्वोऽपि सुखमेवाभिकाङ्क्षते ।
दुःखादुद्विजते प्राणी तदुपायानपेक्षते ॥ ''

दुःखनिवारण - सुखोपादानाभ्यामेव प्रयतते च सर्वः । तयोर्विवेचनं निरूपणं च व्यधायि ऋषिभिर्ऋषिकल्पैर्मनीषिभिः कविभिर्लोकानुजिघृक्षया । तादृक्षु कविपुङ्गवेष्वन्यतमः क्षेमेन्द्रः, स्वजनुषा कश्मीरानलञ्चकार । प्राचीनाः कवयः प्रायः आत्मवृत्तादिकं न किमपि प्राकाश्यन्त संसारस्यासारतां, कृतीनामेव सारतां सम्यक् संभाव्य । सुभाषितरूपत्वेन तादृशीनां कृतीनां उपादेयत्वं द्विगुणीकृतं दृढं चाकारि । मन्यन्तां नाम केचनालङ्कारिका पुराणेतिहासादीनामेव उपदेशप्रवणत्वं, काव्यानां नीतिकाव्यानां च विशेषतः उपदेशेन समाजोपयोगित्वे न कोऽपि विवदते क्षेमेन्द्रस्तु अभिनिविशतेऽस्मिन्विषये । अतस्तेन बहूनि नीतिकाव्यानि निरमायि ।

आत्मवृत्तमेव प्रथमं, कालवंशगुरुप्रभृतिविषयैः साकं समीक्षे । इयं कृतिरेव पृथङ् न भवितुमर्हति यतः, कतिपयग्रन्थाद्यान्तभागानां संकलनरूपत्वात् । भवतु नाम, क्षेमेन्द्रस्य वृत्तं तु ज्ञायते खलु । अयं क्षेमेन्द्रः ' सर्वलोकानां कल्याणकुशलोदयाय ' ग्रन्थानलिखत् । कश्मीरेषु बभूवेत्यादिश्लोकेन अस्य पितामहः सिन्धुः इति, प्रकाशेन्द्रः पिता इति, वदान्यमूर्धन्यः पिता इति च ज्ञायते । अयं अन्वर्थः श्रीवैष्णवः अस्य व्यासदास इति द्वितीयं नामापि आसीत् ।

In Public domain. Digitization Muthulakshmi Research Academy

स्तुतिसङ्कीर्तनाद् विष्णोर्विपुलं यन्मयार्जितम् ।
तेनास्तु सर्वलोकानां कल्याणकुशलोदयः ॥

इत्याचकाङ्क्षे । प्रकाशेन्द्रः, स्वयंभूनिलये देवताः प्रतिष्ठाप्य, कोटिचतुर्भागं देवद्विजमठादिषु दत्त्वा, शम्भुं स्वयं पूजयित्वा, प्रसरद्बाष्पनिर्भरः दोर्भ्यां गाढं समालिङ्ग्य, तत्रैव व्यापद्यत इति बृहत्कथामंजर्याः उपसंहारश्लोकेषु अवर्णयत् । कविगोष्ठीषु नामग्रहणयोग्यतया तुतोष ।

श्रुत्वाभिनवगुप्ताख्यात् साहित्यबोधवारिधेः ।
आचार्यशेखरमणेर्विद्याविवृतिकारिणः ॥
श्रीमद्भागवताचार्य सोमपादाब्जरेणुभिः ।
धन्यतां यः परं यातः नारायणपरायणः ॥

इति स्वविद्याबोधगुरुं तुष्टाव । स्वपितरं, संपूर्णदानतुष्टा ब्राह्मणाः सदा त्वं इन्द्र एवासि परं तु प्रकाश अधिको गुण इति प्रशशंसुरिति -

सम्पूर्णदानतुष्टाः प्राहुस्तं ब्राह्मणाः सदा ।
इन्द्र एवासि किन्त्वेकः प्रकाशस्तेऽधिको गुणः ॥

तेलुगुकवितिक्कनादिभिरिवायं स्वप्रसाम्प्रदायमूचे । विद्वज्जनसपर्याप्त स्वजनोत्सवः इति आत्मानम् अभावयत् ।

संदर्भाः

१. कश्मीरेषु बभूव सिन्धुरधिकः सिन्धोश्च निम्नाशयः
प्राप्तस्तस्य गुणप्रकर्षयशसः पुत्रः प्रकशेन्द्रताम् ।
विप्रेन्द्रप्रतिपादितान्नदानधनभूगोसङ्ख्यकृष्णाजिनैः
प्रख्यातातिशयस्य तस्य तनयः क्षेमेन्द्रनामाऽभवत् । ॥ २ ॥

दशावतारचरितम् ।

स च भोजनरेन्द्रश्च दानोत्कर्षेण विश्रुतौ ।
सूरी तस्मिन् क्षणे तुभ्यं द्वावास्तां कविबान्धवौ ॥

राजतरङ्गिनी - ७ । २५९, सोऽनन्तराजः ।

का.मा.औ.वि. अन्तिमश्लोकाः - पृ.१६० प्र.गुच्छकः

In Public domain. Digitization Muthulakshmi Research Academy

२. आसीत्प्रकाशेन्द्र इति प्रकाशः काश्मीरदेशे त्रिदशेश्वरश्रीः ।
अभूद्गृहे यस्य पवित्रसत्रमच्छिन्नमग्रासनमग्रजानाम् ॥
यः श्री स्वयंभूभवने विचित्रे लेप्यप्रतिष्ठापितमातृचक्रः ।
गोभूमिकृष्णाजिनवेश्मदाता तत्रैव काले तनुमुत्ससर्ज ॥
तस्यात्मजः सर्वमनीषिशिष्यः श्रीव्यासदासापरपुण्य नामा ।
क्षेमेन्द्र इत्यक्षयकाव्यकीर्ति श्चक्रे नवौचित्यविचारचर्चाम् ॥
श्रीरत्नसिंहे सुहृदि प्रयाते शार्वं पुरं श्रीविजयेशराज्ञि ।
तदात्मजस्योदयसिंहनाम्नः कृते कृतस्तेन गिरां विचारः ॥

३. यस्यासिः परिवारकृत्त्रिभुवनप्रख्यातशीलश्रुतेः
सर्वस्यावनतेन येन नितरां प्राप्ता विशेषोन्नतिः ।
आशाः शीतलतां नयत्यविरतं यस्य प्रतापानल -
स्तस्य श्रीमदनन्तराजनृपतेः काले किलायं कृतः ॥

४. अभिनवगुप्तसमयः साहित्यव्यवसायस्य ९८०-१०२० मध्ये
आसीदिति क्षेमेन्द्रः ९९० तमकाले अजायत १०६६
पश्चात्कदाप्यम्रियत ।
स तमूचे करोम्येव प्रागेतच्चरितं मम ।
हृष्टः सत्यवतीसूनुः स्वप्ने ज्ञाननिधिर्ददौ ॥ इति ।

निबन्धस्यास्यादौ उक्तरीत्या अयं क्षेमेन्द्रः - लोभाभिमानमलिनानि धनानि नित्यं, कान्ताकटाक्षचटुलानि च जीवितानि । ज्ञात्वेति चन्द्रधवलानि यशांसि येन काव्यैः स्थिराणि भुवनेषु निवेशितानि अमंस्त । अपि च सहृदयानेवं प्रशशंस -

गुणा गुणितया भान्ति येषु वस्तेषु विस्मयः ।
निर्गुणेषु गुणानेव ये वदन्ति जयन्ति ते ॥ इति ।

सुवृत्ततिलकं, भूभृद्भर्तुर्भुवनविजयिनोऽनन्ताराजस्य राज्ये कृतं, औचित्यविचारचर्चा - तस्य श्रीमदनन्तराजनृपतेः काले किलाऽयंकृतः,

In Public domain. Digitization Muthulakshmi Research Academy

काश्मीरेषु पृथुप्रतापसवितुः कीर्त्यंशुतारापतेः
प्रौढारातिवनानलस्य धनदस्येन्द्रस्य भूमण्डले ।
विश्वाकारवतः पुनः कलियुगे विष्णोरिवोत्साहिनो
राज्ये श्रीमदनन्तराजनृपतेः काव्योदयोऽयं कृतः ॥

इति कविकण्ठाभरणान्ते चोपवर्णितं श्रीक्षेमेन्द्रेण । समयमातृकां १०५० ख्रि.प प्रणिनाय । अनन्तवर्मणः राज्यकालः १०२८-१०६३ मध्य आसीत् । अतः क्रिस्तोः एकादश शतकस्य द्वितीयतृतीयचरणयोः क्षेमेन्द्रस्य साहित्यिककृषिरवर्तत । रामयशोनामकविप्रार्थनया बृहत्कथामञ्जरीं भारतमञ्जरीं, रामायणमञ्जरीं च व्यधात् क्षेमेन्द्रः ।

स श्रीदेवधराख्यस्य द्विजराज्यपदस्थितेः ।
सर्वज्ञस्याज्ञया चक्रे कथामेतां विनोदिनीम् ॥ इति बृ.मं

देशोपदेशः नर्ममाला च अन्योन्यपूरके कृती । एते द्वे अपि कविकालीनकाश्मीर समाजस्थितपीडनं, दम्भं, विद्रवपरिस्थितीः प्राधान्येन समुपवर्णयितुं , प्रजाः ताः प्रति सावधानाः कर्तुं विरचिते इव प्रतिभातः । नामसार्थक्यं देशोपदेशे लक्ष्यते । उपदेशेन साकं ताः परिस्थितीः व्याजेन स्तूयन्ते च । अष्टसु उपदेशेषु एतां कृतिं जुगुम्फ कविः । प्रथमे दुर्जनवर्णनं, यः निरन्तरं मुग्धान्प्रतारयितुं आकाश-यक्षनगरनिर्माणं करोति, द्वितीये स्वधननिधनरक्षाचार्य वर्यकदर्यवर्णनं, तृतीये सर्वस्वहारिण्या वेश्याया वर्णनं, चतुर्थे निष्कृपायाः कुट्टन्या वर्णनं, पञ्चमे रसविदग्धविटवर्णनं, षष्ठे छात्रवर्णनं, सप्तमे वृद्धभार्यावर्णनं, अन्तिमेऽष्टमे गुरुदिविरकुलवधू भट्ट वनिक् कवि धातुवादी द्यूतकर बुद्धिर्विहीनगुरुभक्तवैणिकवैद्य निर्गुटपण्डितलेखक जटाधर रण्डावर्णनं व्यधायि । एतत्सर्वं स्मितकारणतया उवाच अपि च सः लोकोपहासेषु नालं पटुः इति च ।

हासेन लज्जितोऽत्यन्तं न दोषेषु प्रवर्तते ।
जनस्तदुपकाराय ममायं स्वयमुद्यमः ॥

In Public domain. Digitization Muthulakshmi Research Academy


इति अनुबन्धचतुष्टयं बबन्ध। हासव्यपदेशयुक्त्या देशोपदेशः क्रियते इति अभाणि। पिंडार्थी सत्पात्राणि दूषयन् कलहोत्करः अशुचिः पिशुनः शुनः तल्यतां बिभर्ति। शनितुल्योऽप्यशनिरिति, मन्दत्वेन पापग्रहत्वेन शुभकर्मणां अनिष्टत्वेन क्रौर्येण च इति विरोधश्लेषाभ्यां पिशुनं प्रशशंस। खचित्रमपि मायावी लीलया रचयतीत्यतः खल इति च निरूचे। खलः ब्रह्मविद्यामिव कर्णे पैशुन्यं पठति। धनमत्तेन नीचेन प्रभविष्णुना पदस्थेन पिशुनेन पीडिता सती प्रजे क्व गमिष्यसीति खेदं प्रकटीचकार।

दूषणानुगतो नित्यं जनस्थानविनाशकृत्।
दुर्मदो विबुधद्वेषी पुरुषादः खरः खलः॥

इति - भ्रुकुटिकुटिलदृष्टिर्धातुरन्यैव सृष्टिर्धनमदलिप्तः प्रौढवादानुलिप्तः।

सदसि कुटिलदोषैर्दुर्जनः सज्जनानां।
मलिनयति यशांसि स्फारकैलासभांसि॥

इति।

कदर्यः कर्कशः सर्वाशानिष्फलः पर्यन्ते विटभोज्यः अतः खदिर इवास्ते। यतेन्द्रियः पांसुशायी निःसङ्गः प्रसृतिंपचः अक्रुद्धः साक्षान्मुनिरेव परं अस्य तृष्णा वर्धते। तृणतुषसंचयाय सहस्राक्षः गृहव्यये वज्रहस्तः अशनाच्छादनच्छेदात् लुब्धः पाकशासन एव। कार्यपीडानिरोधेऽपि नार्थं मुंचति सग्रहः। सञ्चायेष्वेकदृष्टिः कदर्यः शुक्रतां गतः॥ अर्थिभ्यो गले हस्तं गृहे अर्गलं दत्वैवाश्नाति अतः तत्सदृशो दाता जगति नास्ति। तस्य पटी पितामहक्रीता, शाटकः तत्पूर्वप्राप्तः अहो लुब्धस्य दिव्यवस्त्राणि युगैरपि न क्षीयंते। स्वबन्धूनागतान्दृष्ट्वा गृहे दारकलहव्याजेनानशनव्रतं पालयति। अयं व्ययभीरुः भट्टव्ययं निवार्यैव पुत्रकार्यं करोति, कदर्यस्य भार्या जारोत्सवव्ययं करोति। कार्यगौरवात् चरणौ अपि चूषयति। तस्य, धनं भूमिर्गृहं दाराः सर्वथा जन्मसञ्चितं परार्थमेव पर्यन्ते कदर्यस्य जिनस्य च।

In Public domain. Digitization Muthulakshmi Research Academy

विरमति मतिहीनो लाभलोभेन वित्तं,
जरयति यतिरूपः संयमादिन्द्रियेच्छाम् ।
चरति च रतिविघ्नं सव्ययत्वोद् गृहिण्याः
स्वधननिधनरक्षाचार्यवर्यः कदर्यः ॥

इति ।

वेश्या, चित्तसद्भाववर्जिता सूत्रप्रोता यन्त्रपुत्रिका नर्तकी इव सर्वं कृत्रिमं चेष्टते । मस्तके भुजयोः कण्ठे जतुरक्षाशतान्विता । भूतवित्रासजननी सा भूतबलिमिच्छति । सा गतयौवना शुक्लकेशरञ्जनतत्परा सर्वस्यापि शिष्यतां वश्ययोगार्थिनी याति । स्वयं कविरपि क्षेमेन्द्रः, बन्धकीं अर्थलुब्धामतिप्रौढां चित्रालङ्कारहारिणीं,कवेः प्रौढया वाण्या उपामात् । गणिकां योगिनीत्वेन दुर्जनश्रीत्वेन, दूष्पूरतृष्णात्वेन जनतारूपहारिणी जरात्वेन , मृत्योर्मतिरूपसमानत्वेन न्यरूपयत् क्षेमेन्द्रः ।

कुट्टनी कुरुराजस्व सेनेव भगदत्तप्रभावाढ्या कर्णशल्योत्कटस्वना विराजते किन्तु सा निष्कृपा इति अवर्णयत् । सर्वमातेव कुट्टनी वात्सल्यपेशलगिरा पुराणस्यापि वेधसः पुत्रेत्याह्वानं करोति, जृम्भमाणस्य जिह्वामपि नेतुं समर्था, सर्वस्वेनाप्यसंतुष्टा स्नेहशतैरपि रूक्षा, कामिनां विघ्नः कुट्टनी, पुंसां कुट्टनी एवेति उपदिदेश ।
विटं सर्वग्रहरूपमुपावर्णयदित्थम् –

शूरो दोषाकरः स्त्रीणां वक्रः चित्ते खलो बुधः ।
गुरुः पापे व्यये शुक्रो विटः पथि शनैश्चरः ॥ इति
दर्पयन् दन्तताम्बूलो दन्त्यप्रायाक्षरैः पदैः ।
अलग्नोष्ठपुटो वक्ति कत्थनः कटुको विटः ॥
यत्नेन खादिरं रागं रक्षन् बद्धमिवाधरे ।
प्रपायां मण्डकं भुंक्ते वेशमात्रधनो विटः ॥
सः जननी मपि सजने पुरः मम कुम्भदासीति वदति ।
क्षपितविकलकालो धातुवादी विटाग्र्यः ।
सततमलिनभस्त्राभस्मभूषाङ्गहस्तः ॥

In Public domain. Digitization Muthulakshmi Research Academy

विकटकचकरालः कज्ञलालिप्तभालः ।
चरति रसविदग्धो दग्धचीरः पिशाचः ॥

छात्रः विशेषतः देशान्तरगतः गौडच्छात्रः स्पर्शं परिहरन् याति गौडः कक्षाकृताञ्चलः कुञ्चिते नैकपार्श्वेन दम्भभारभरादिव ॥ सपवित्रस्य छत्रिणः स्पर्शहुङ्कारकारिणः गौडस्य अपरपाकिनः अग्रे मुनयोऽपि लज्जन्ते । सः ग्रहवारेषु भुङ्क्ते । सत्रे प्राप्तैः भोज्यैरुद्वर्तनैः सः अवाप्ततिलकस्सन् भुजङ्गः निर्मोकमिव त्यक्त्वा नवः सञ्जायते । वृद्धकीरजिगीषया पाण्डित्ये प्रवृत्तः परं तु कष्टेनोङ्कारं जानाति स्वस्तिज्ञानं दूरापास्तम् । लिपिं न जानाति विप्रतिप्रकारं न अवगच्छति परं भाष्ये तर्के प्रभाकरे गौडः प्रारम्भं करोति । अत्र व्यासादीनां श्लोकः अनुसन्धेयः । यस्य गेहिनी तरुणी तमेव सहते अन्यान् सर्वान् लगुडहतान् निरस्यति । उपानत्कुत्सिता रावगर्वितः (शनैः व्रजन् ) लोहितक्षुरिकापट्टवेष्टितां कटीं आलोकयन् शनैः व्रजति । गौडस्य करण्डग्रन्धिभेदनं कितवः कुट्टनी वेश्या चर्मकारः नापितः पञ्च एव कर्तुं प्रभवन्ति । शीतकाले शिरःशाट्या वेश्यावेश्मसु कालमुखः शुक्लदशनः हसन्नटन् वानरायते दैशिकः । गौडच्छात्रः उदराबद्धवस्त्रेण नादिना ग्रन्थिजूटेन लगुडोद्धतहस्तेन मठं उन्मूलयति । तं अनेक क्षुरिकाघातक्षुण्णकुक्षिणं गौडयक्षं दृष्ट्वा सत्रिणः सर्वे बिभ्यति न कोऽपि प्रतिपसतां यास्यति ।

श्रुङ्गग्राही दधिक्षीरे सूदाघातेषु दण्डधृत् ।
मठछात्रः सदा छत्री न तथापि स दीक्षितः ॥

सत्रान्नेन मृता बुद्धदैशिकाः तत्रैव जाताः सत्रतूर्ये कुक्कुटा भूत्वा क्रोशन्ति । श्राद्धपक्षे मठछात्रो उक्कगृहे भुक्त्वा शूलारूढ इव ऊर्ध्वनयनः क्षितिमेव न पश्यति ।

छात्रावासः वृद्धराक्षसपूर्णा घोरा दारुगिरेर्गुहा नायं मठः शठमठः हठमठो वा नेति वर्णयति ।

मठश्मशाने वेतालाः पिशाचाः स्नानकोष्ठके ।
घटयन्ति जनं छात्राः सत्रे सन्त्रासभैरवाः ॥

In Public domain. Digitization Muthulakshmi Research Academy

गौडछात्रातुरस्य सेवा वैद्याय कुपितकप्यालिङ्गनगलव्यालबन्धन सदृशीति अखिद्यत क्षेमेन्द्रः ।

स्नाने दाने व्रते श्राद्धे निष्कारणरुषा ज्वलन् ।
मातरं चोदयामीति वदन् सर्वं करोति सः ॥
व्रजति दिनमखिन्नः सत्रपां सत्रपालीं ।
रमयति च कुमारीं दन्तरूपो विरूपः ॥
क्षपयति भजमानः स्वां कुलालीं कुलालीं ।
विलसति मठचट्टः पापकारी विकारी ॥ इत्यवर्णयत् ।

तत्कालस्थितं सामाजिकदुराचारं वृद्धतरुणीविवाहं वृद्धभार्योपदेशे निबबन्ध। वृद्धो मूर्तज्वर इव आस्ते। वृद्धस्य तरुण्या विवाहः, भार्यासमागमः, वृद्धस्य क्षितिपतनं, वृद्धदर्शनभीतायास्तरुणपत्न्याः पलायनं बन्धुभिः कष्टेन तस्या आनयनं, तस्य अशक्तता, वाजीकरणयत्नः त्रिवार्षिकपुष्टिः अतिसारवमनैर्नाशः, परबीजेन गर्भिणीत्वं, पुत्रजन्म, पुत्रोत्सवे घुणजग्धस्य दग्धतरोरयं अङ्कुजात इति ब्रुवाणानां स्त्रियां नर्तनं , वृद्धस्य श्वासोपरोधः, गेहिन्या धनपृच्छा इत्यादिकमुपवर्णनेन श्लोकेनोपसंजहार -

विरतसुरतशक्तिः स्पर्शमात्रैकभक्तिः
निशि निशितवचोभिर्भर्त्स्यमानो गृहिण्या ।
भुजभुजगनिबद्धं स्वक्षये वृद्धयक्षः
सुभगभगनिधानं रक्षति न्यस्तहस्तः ॥ इति

गुरुरपि लाघवहेतुः भव इव विभ्रमहेतुः, रागद्वेषसमाकुलः, उग्रः महामोहलोभदम्भमयः इति तादृशं गुरुं ववन्दे क्षेमेन्द्रः । दीनारक्षयकारणात् दीक्षेत्युक्ता तेन कृता । गुणरहितो रूपकारी शिष्यवधूनां सदा गुरुर्गदितः ।

<u>दिविरः</u> :- लुण्ठितसकलसुरद्विजपुरनगरग्रामघोषसर्वस्वः पुनरपि हरणाकाङ्क्षी दिविरः दीक्षितः गुरुं व्रजति। कलमशिखाहतजनतादीनतराक्रन्दलब्धविभवः सः उन्नतिहेतोर्यागविधाने मतिं चकार । सः गुरुं अगच्छत् ।

**<u>कुलवधूः</u>** :- दीक्षिता गुरुसुरतपवित्रमात्मानं कृत्वा गृहमागत्य पतिं भोजनानन्तरं पादाघातैः हन्ति ।

In Public domain. Digitization Muthulakshmi Research Academy


**भट्टः** :- मधुपिपासुः मत्स्यशरावहकहस्तः दीक्षितः भट्टः गुरुगृहमायाति । रात्रौ मैरवं पीत्वा प्रातः अन्यभट्टेषु अमिलत् । श्वलीढास्यः ।

**वणिक्** :- मार्जनरेणुकरालो गुडमधुघृतपिङ्गतैललिप्तकरः । ग्राहकघट्टनसक्तो हट्टपिशाचो वणिङ्मूर्तः । सोऽपि आर्थोदयकाङ्क्षी गुरुगृहमागतमाप्तो न तु मोक्षस्य कृते ।

**कविः** :- काव्यहेवाकी सारस्वतमन्त्रार्थी किञ्चित् संस्कारलिप्तजिह्वाग्रः कुलवागीशी सिद्धयै गुरुगृहं आयात् । सः अज्ञातधातुलिङ्गं मुखकूणनं उल्बणमपक्वं अज्वरं प्राणैः सह कृच्छ्रात् अज्वरमिव श्लोकं वमति । दिवानिशं हृदयं शुष्कश्लोकध्यानात् क्लिश्नाति । स्वां वृत्तिं न कुरुते ।

**द्यूतकरः** :- श्वेतार्ककृतिगपयतिमंत्रार्थी कितवचक्रविजयाय । कितवःशफरीमण्डकसिन्धूरकरो गुरुं याति ॥

मूत्रनिरोधात् कृच्छ्री सततमनशनव्रतो जितो मौनी ।
धत्ते तापसवृत्तिं चित्रं संसारवञ्चकः कितवः ॥

**शिष्यः** - गुरुरिति वितरति सर्वं पशुसंकाशो गतानुगतिः ।
बुद्धिविहीनः शिष्यः केवलभक्तो गलाटः .... मध्यः ॥
यागगृहेष्वासन्नो भोजनपानैकसेवकः शिष्यः ।
चौरस्याप्यतिचौरश्चरति सदा वञ्चकस्य गुरोः ॥
जय जय भगवन् मोक्षक्षपणैकनिमित्तदत्तसंसारः ।
मग्नमधर्मपथे मामुद्धर नाथ स्वहस्तेन ॥
इत्यादिस्तुतिवचनैः पादाग्रलीनमस्तकः स गुरोः ।
भुङ्क्ते पिबति च दम्भाद् भक्तिविहीनो महाधूर्तः ॥

**पण्डितः** :- मूर्खाणां पंडितः चरितैः गर्वहेतुः पदमन्दसानुनासिकदीर्घपदै र्जनितशिरःशूलाः गुरुं याति । वाक्यसमन्वयं न जानाति । विपरीताच्छिन्नार्थैः टिप्पिकाबन्धैः पदैः पठति । आसाधुशब्दी विद्वान् विस्मृतलिङ्गो नपुंसकप्रकृतिः अविदितसकलसमासः असत्सु सदा द्वन्द्वमेव जानाति ।

**लेखकः** :- संकरकृद् वर्णानां विबुधानां पतितपंक्तिभिर्भयदः ।
सततामेध्यः पापी कलिकालो लेखकः साक्षात् ।

In Public domain. Digitization Muthulakshmi Research Academy

गौडछात्रातुरस्य सेवा वैद्याय कुपितकप्यालिङ्गनगलव्यालबन्धन सदृशीति अखिद्यत क्षेमेन्द्रः ।

स्नाने दाने व्रते श्राद्धे निष्कारणरुषा ज्वलन् ।
मातरं चोदयामीति वदन् सर्वं करोति सः ॥
व्रजति दिनमखिन्नः सत्रपां सत्रपालीं ।
रमयति च कुमारीं दन्तरूपो विरूपः ॥
क्षपयति भजमानः स्वां कुलालीं कुलालीं ।
विलसति मठचट्टः पापकारी विकारी ॥ इत्यवर्णयत् ।

तत्कालस्थितं सामाजिकदुराचारं वृद्धतरुणीविवाहं वृद्धभार्योपदेशे निबबन्ध। वृद्धो मूर्तज्वर इव आस्ते। वृद्धस्य तरुण्या विवाहः, भार्यासमागमः, वृद्धस्य क्षितिपतनं, वृद्धदर्शनभीतायास्तरुणपत्न्याः पलायनं बन्धुभिः कष्टेन तस्या आनयनं, तस्य अशक्तता, वाजीकरणयत्नः त्रिवार्षिकपुष्टिः अतिसारवमनैर्नाशः, परबीजेन गर्भिणीत्वं, पुत्रजन्म, पुत्रोत्सवे घुणजग्धस्य दग्धतरोरयं अङ्कुजात इति ब्रुवाणानां स्त्रियां नर्तनं , वृद्धस्य श्वासोपरोधः, गेहिन्या धनपृच्छा इत्यादिकमुपवर्णनेन श्लोकेनोपसंजहार -

विरतसुरतशक्तिः स्पर्शमात्रैकभक्तिः
निशि निशितवचोभिर्भर्त्स्यमानो गृहिण्या ।
भुजभुजगनिबद्धं स्वक्षये वृद्धयक्षः
सुभगभगनिधानं रक्षति न्यस्तहस्तः ॥ इति

गुरुरपि लाघवहेतुः भव इव विभ्रमहेतुः, रागद्वेषसमाकुलः, उग्रः महामोहलोभदम्भमयः इति तादृशं गुरुं ववन्दे क्षेमेन्द्रः । दीनारक्षयकारणात् दीक्षेत्युक्ता तेन कृता । गुणरहितो रूपकारी शिष्यवधूनां सदा गुरुर्गदितः ।

<u>दिविरः</u> :- लुण्ठितसकलसुरद्विजपुरनगरग्रामघोषसर्वस्वः पुनरपि हरणाकाङ्क्षी दिविरः दीक्षितः गुरुं व्रजति। कलमशिखाहतजनतादीनतराक्रन्दलब्धविभवः सः उन्नतिहेतोर्यागविधाने मतिं चकार । सः गुरुं अगच्छत् ।

<u>कुलवधूः</u> :- दीक्षिता गुरुसुरतपवित्रमात्मानं कृत्वा गृहमागत्य पतिं भोजनानन्तरं पादाघातैः हन्ति ।

In Public domain. Digitization Muthulakshmi Research Academy


**भट्टः** :- मधुपिपासुः मत्स्यशरावहकहस्तः दीक्षितः भट्टः गुरुगृहमायाति । रात्रौ मैरवं पीत्वा प्रातः अन्यभट्टेषु अमिलत् । श्वलीढास्यः ।

**वणिक्** :- मार्जनरेणुकरालो गुडमधुघृतपिङ्गतैललिप्तकरः । ग्राहकघट्टनसक्तो हट्टपिशाचो वणिङ्मूर्तः । सोऽपि आर्थोदयकाङ्क्षी गुरुगृहमागतमाप्तो न तु मोक्षस्य कृते ।

**कविः** :- काव्यहेवाकी सारस्वतमन्त्रार्थी किञ्चित् संस्कारलिप्तजिह्वाग्रः कुलवागीशी सिद्धयै गुरुगृहं आयात् । सः अज्ञातधातुलिङ्गं मुखकूणनं उल्बणमपक्वं अज्वरं प्राणैः सह कृच्छ्रात् अज्वरमिव श्लोकं वमति । दिवानिशं हृदयं शुष्कश्लोकध्यानात् क्लिश्नाति । स्वां वृत्तिं न कुरुते ।

**द्यूतकरः** :- श्वेतार्ककृतिगपयतिमंत्रार्थी कितवचक्रविजयाय । कितवःशफरीमण्डकसिन्धूरकरो गुरुं याति ॥

मूत्रनिरोधात् कृच्छ्री सततमनशनव्रतो जितो मौनी ।
धत्ते तापसवृत्तिं चित्रं संसारवञ्चकः कितवः ॥

**शिष्यः** - गुरुरिति वितरति सर्वं पशुसंकाशो गतानुगतिः ।
बुद्धिविहीनः शिष्यः केवलभक्तो गलाटः .... मध्यः ॥
यागगृहेष्वासन्नो भोजनपानैकसेवकः शिष्यः ।
चौरस्याप्यतिचौरश्चरति सदा वञ्चकस्य गुरोः ॥
जय जय भगवन् मोक्षक्षपणैकनिमित्तदत्तसंसारः ।
मग्नमधर्मपथे मामुद्धर नाथ स्वहस्तेन ॥
इत्यादिस्तुतिवचनैः पादाग्रलीनमस्तकः स गुरोः ।
भुङ्क्ते पिबति च दम्भाद् भक्तिविहीनो महाधूर्तः ॥

**पण्डितः** :- मूर्खाणां पंडितः चरितैः गर्वहेतुः पदमन्दसानुनासिकदीर्घपदै र्जनितशिरःशूलाः गुरुं याति । वाक्यसमन्वयं न जानाति । विपरीताच्छिन्नार्थैः टिप्पिकाबन्धैः पदैः पठति । आसाधुशब्दी विद्वान् विस्मृतलिङ्गो नपुंसकप्रकृतिः अविदितसकलसमासः असत्सु सदा द्वन्द्वमेव जानाति ।

**लेखकः** :- संकरकृद् वर्णानां विबुधानां पतितपंक्तिभिर्भयदः ।
सततामेध्यः पापी कलिकालो लेखकः साक्षात् ।

In Public domain. Digitization Muthulakshmi Research Academy

एवं सर्वेऽपि गुरुं आगच्छन्ति इति वर्णयित्वा अन्ते स्वाशयमेवं स्पष्टीचकार –

इत्युद्देशनिदर्शनेन विविधं यत्किंचिदुक्तं मया
तत् सर्वं स्मितकारणं सहृदयाः शृण्वन्तु सन्तः क्षणम् ।
क्षेमेन्द्रः प्रणतिं करोति न पटुलोकोपहासेष्वलं
किन्त्वेष व्यपदेशतः प्रतिपदं देशोपदेशः कृतः ॥

अपि च स्वनिर्वेदमुररीचकार –

दीर्घा दूरे दुराशा खलमुखरमुखालोकने का कथैव
सेवासन्तापशान्तिः प्रशमपरिचिता स्वान्तसन्तोषलक्ष्मीः ।
सर्वं श्लाघ्यं वदन्ते पयसि बुसरजः किन्त्वयं दोषलेशाद्
यस्योन्मेषः कथानां हृदयपरिमलः शुद्ध्यते केन सार्धम् ॥
दर्पान्धो नगरे तथा परगुणोत्कर्षे महामत्सरो
ग्रामे शेषवृषाशयस्तरुशिलाप्रायः परो गह्वरः ।
सोन्मेषप्रतिभः प्रगल्भवचसामन्तश्चमत्कारिणाम्
चित्रं नास्ति विचारचारुचतुरः प्रत्युत्तरार्हः सुहृत् ॥

इति शम्

उपयुक्तग्रन्थः

१. क्षेमेन्द्रलघुकाव्यसंग्रहः संस्कृतपरिषद् ,
उस्मानियाविश्वविद्यालयः ,
हैदराबाद् - ५०० ००७ ,
द्वितीय मुद्रणम् - २००९

In Public domain. Digitization Muthulakshmi Research Academy


**ग्रन्थस्य नाम** - क्षेमेन्द्रः प्रतिपाद्यविषयप्रकाशकत्वेन स्वग्रन्थस्य औचित्यविचारचर्चा इति नामकरणमकरोत् । तेनैवोक्तम् - (१)औ.वि.च.ग्रन्थान्तश्लोकः सं- ३ '' क्षेमेन्द्र इत्यक्षयकाव्यकीर्तिश्चक्रे नवौचित्यविचारचर्चाम्'' इति क्षेमेन्द्रः '' औचित्यविचारः '' औचित्यचर्चा इति वा, औचित्यजीवितमिति वा लघुनाम अकृत्वा कीदृशं प्रयोजनमभिसन्धाय '' औचित्यविचारचर्चा '' इति दीर्घं नाम कृतवानिति न ज्ञायते ।

**ग्रन्थस्य स्वरूपम्** - अयं ग्रन्थः परिमाणेन नानल्पः, न वा अल्पः । अत्र एकोनचत्वारिंशत् श्लोकाः औचित्यलक्षणपराः सन्ति । तत्र ग्रन्थारम्भश्लोकाः त्रयः,अनुबन्धचतुष्टयप्रतिपादनपराः अन्तर्भूय तिष्ठन्ति । अधिकतया ग्रन्थान्ते पञ्चश्लोकाः कविना स्वविषयकाः निबद्धा । एवं च आहत्य चतुश्चत्वारिंशत् एते श्लोकाः । उदाहरणश्लोकाः सन्ति अष्टषष्टिः, प्रत्युदाहरणश्लोकाः सन्ति सप्तत्रिंशत् । आहत्य पञ्चाधिकशतं श्लोकाः । प्रतिलक्षणं प्रतिश्लोकं क्षेमेन्द्रेणैव वृत्तिर्विरचिता अस्ति । इयं वृत्तिः संक्षेपरूपेण तिष्ठति । अतः नातिविस्तृता । एवं ग्रन्थपरिमाणं नातिविस्तृतं, नात्यल्पं भवति ।

**उदाहृतश्लोककवयः** - क्षेमेन्द्रेण पञ्चाधिकशतं श्लोकाः उदाहृताः । तेषां मध्ये पञ्चत्रिंशत् श्लोकाः क्षेमेन्द्रस्यैव । सप्ततिः श्लोकाः इतरेषां कवीनाम् । ते कवयः द्वात्रिंशत् भवन्ति । ते च १. परिमलः २. श्रीहर्षः ३. राजशेखरः ४. कालिदासः ५. भवभूतिः ६. भट्टनारायणः ७. भट्टबाणः ८. कार्पटिकः ९. चन्द्रकः १०. व्यासः ११. अमरुकः १२. गौडकुम्भकारः १३. भट्टप्रभाकरः १४. मालवरुद्रः १५. मालवकुवलयः १६. भट्टभल्लटः १७. दीपकः १८. गाङ्गकः १९. धर्मकीर्तिः २०. श्यामलकः २१. प्रवरसेनः २२. मुक्तापीडः २३. श्रीमदुत्पलराजः २४. भट्टेन्दुराजः २५. मातृगप्तः २६. भट्टलट्टनः २७. कुमारदासः २८. यशोवर्मदेवः २९. वराहमिहिरः ३०. श्रीचक्रः ३१. माघः ३२. परिव्राजकः ।

**उदाहृतौचित्यानां संज्ञाः** - क्षेमेन्द्रेण सप्तविंशत्यौचित्यानि नाम्ना निर्दिष्टानि, लक्षितानि, सोदाहरणं निरूपितानि च । तानि यथा -

In Public domain. Digitization Muthulakshmi Research Academy

# २. औचित्यविचारचर्चा - एकम् परिशीलनम्

आचार्यः कोम्पेल्ल रामसूर्यनारायणः

अलङ्कारशास्त्रे क्षेमेन्द्रकृतायाः औचित्यविचारचर्चायाः विलक्षणं स्थानमस्ति । एवं रसादिसम्प्रदायेषु औचित्यसम्प्रदायस्य महानादरोऽस्ति तत्सम्प्रदायप्रवर्तकत्वेन क्षेमेन्द्रस्य गरीयो मूल्यमस्ति । लोके साहित्यज्ञानां कृत्यानि वचांसि च औचितीसमन्वितानि भवन्ति । कस्यचिदपि साहित्यज्ञस्य मुखात् न अनौचित्यसमन्वितं वचनं किञ्चिदपि निस्सरति । उचितज्ञः उचितानुष्ठाता उचितवाक् लोके पूज्यते अन्यस्तु दूष्यते । महाकवयः स्वीयकाव्यद्वारा लोकानामुपदेशप्रदानाय नायकादीनामुचितानि कृत्यानि वचनानि निबध्नन्तो दृश्यन्ते । औचित्यपरिपालनमसिधाराव्रतसदृशं भवति । क्षणिकानवधानमपि कवीनां महते औचित्यभङ्गाय भवति । लेशतः अपि कृतमनौचित्यं सर्वमपि काव्यसौन्दर्यं भञ्जयितुं प्रभवति । अतः महाकविभिरनौचित्यस्य परिहरणे औचित्यस्य परिपोषणे नितान्तं जागरूकैः भवितव्यम् । सहृदयाः अपि उचितज्ञाः भवेयुः । लोकयात्रा अनन्तप्रकारा भवति । अनन्तेषु प्रकारेषु औचित्यान्यपि अनन्तान्येव भवन्ति । यत्र यत्र यद्यदौचित्यं वर्तते तत्र सर्वत्रापि तत्तदौचित्यपरिपालने अकृते जायमानमनौचित्यमपि बहुप्रकारमेव भवति । अतः एव ध्वन्यात्मवादी आनन्दवर्धनः ध्वन्यालोके तृतीये उद्द्योते औचित्यमधिकृत्य अनल्पमवादीत् । तथापि आनन्दवर्धनेन ध्वनिप्रतिपादनतत्परेण प्रसङ्गतः ध्वनिपोषकतया प्रतिपादिते औचित्ये कदाचित् सर्वस्यापि दृष्टिः न प्रसरेत् इति धियेव क्षेमेन्द्रेण साहित्यज्ञानां दृष्टिम् औचित्याभिमुखं प्रवर्तयितुमौचित्यस्य काव्यजीवितत्वमभिधाय समग्रो ग्रन्थः औचित्यविचारस्य कृते निर्ममे इति प्रतिभाति । सः ग्रन्थः साहित्यज्ञैः सर्वैरादरणीयः, समीक्षणीयश्च । अतः औचित्यविचारचर्चानामको ग्रन्थः अत्र समीक्ष्यते ।

In Public domain, Digitization Muthulakshmi Research Academy


१. पदौचित्यम् २. वाक्यौचित्यम् ३. प्रबन्धार्थौचित्यम् ४. गुणौचित्यम् ५. अलङ्करणौचित्यम् ६. रसौचित्यम् ७. क्रियौचित्यम् ८. कारकौचित्यम् ९. लिङ्गौचित्यम् १०. वचनौचित्यम् ११. विशेषणौचित्यम् १२. उपसर्गौचित्यम् १३. निपातौचित्यम् १४. कालौचित्यम् १५. देशौचित्यम् १६. कुलौचित्यम् १७. व्रतौचित्यम् १८. तत्त्वौचित्यम् १९. सत्त्वौचित्यम् २०. अभिप्रायौचित्यम् २१. स्वभावौचित्यम् २२. सारसङ्ग्रहौचित्यम् २३. प्रतिभौचित्यम् २४. अवस्थौचित्यम् २५. विचारौचित्यम् २६. नामौचित्यम् २७. आशीःऔचित्यम् इति ।

**लक्षणनिर्माणसरणिः -**

एकैकस्य औचित्यस्य लक्षणं निर्मातुं एकैकस्य अनुष्टुब्श्लोकस्य अर्धभागो विनियुक्तः । श्लोकस्य द्वितीयार्धे एका उपमा निबद्धा । कदाचिदुपमाद्वयं निबद्धं तद्यथा –

(२) औचित्यरचितं वाक्यं सततं सम्मतं सताम् ।
त्यागोदग्रमिवैश्वर्यम् शीलोज्ज्वलमिव श्रुतम् ॥ औ.वि.च. १२ श्लो

(३) तिलकं बिभ्रती सूक्तिः भात्येकमुचितं पदं ।
चन्द्राननेव कस्तूरीकृतं श्यामेव चान्दनम् ॥ औ.वि.च. ११ श्लो

इति ॥ एवं सर्वत्र ।

**वृत्तिनिर्माणसरणिः** - अतिसंक्षेपेण लक्षणानि वृत्तौ विवृतानि वर्तन्ते । अत्र द्वितीयश्लोकस्य वृत्तिरेवं भवति - '' एकमेवोचितं पदं तिलकायमानं बिभ्राणासूक्तिः समुचितपरभागशोभातिशयेन रुचिरतामावहति '' इति एवमेव उदाहरणसमन्वयेऽपि दृश्यते । पदौचित्यस्य परिमलस्य श्लोकः ।

उदाहृतः - मग्नानि द्विषतां कुलानि समरे त्वत्खड्गधाराकुले
नाथेस्मिन्निति वन्दिवाचि बहुशो देव श्रुतायां पुरा ।
मुग्धा गुर्जरभूमिपालमहिषी प्रत्याशया पाथसः
कान्तारे चकिता विमुञ्चति मुहुः पत्युः कृपाणे दृशौ ॥

इति ।

In Public domain. Digitization Muthulakshmi Research Academy

अत्र वृत्तिरेवं भवति - '' अत्र मुग्धापदेनौचित्यचमत्कारिणा सूक्तिः शरदिन्दुवदनेव श्यामतिलकेन श्यामेन शुभ्रविशेषकेण विभूषिता सकलकविकुलललामभूतां विच्छित्तिमातनोति '' इति ।
उदाहरणपद्धतिः :- सर्वत्र औचित्यमेकस्मिन्नुदाहरणे समन्वितं कृत्वा अनौचित्यस्याप्युदाहरणं दत्तवान् । तत्र अनौचित्यस्य कालिदासस्य पद्यद्वयं माघस्यैकं पद्यमनौचित्यस्य उदाहरणतया दत्तानि ।
तत्र कालिदासस्य श्लोकः -

**नाम्नः अनौचित्यस्य उदाहरणतया दत्तः । सः श्लोकोऽयम् -**

(४) * क्रोधं प्रभो संहर संहरेति यावद्गिरः खे मरुतां चरन्ति ।
तावत्सवह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार ।।
कुमारसम्भवम् - ३स, ७२ श्लो

वृत्तौ क्षेमेन्द्रेण उक्तम् - अत्र पश्यतो भगवतः त्रिनेत्रस्य स्मरशरनिपातक्षोभे वर्ण्यमाने तन्निराकारोपशमाय संहर संहर प्रभो क्रोधमिति यावद्वचः खे देवानां चरन्ति तावद्भवनेत्रोद्भवः स वह्निः मदनं भस्मराशिशेषमकार्षीत् इत्युक्ते संहारावसरे रुद्रस्य भवाभिधानमनुचितमेवेति ।
(५) अत्र व्याख्याकाराः एवं लिखन्ति - '' भवस्य न विनाशं प्रति साक्षात्सम्बन्धस्तस्य तु वह्निसमुत्पादने एव गतार्थत्वमित्यत्र संहारावसरेऽपि वह्निजन्मरूपोत्पादनप्रसङ्गेन न भवेति नाम्नः नैरर्थक्यमित्यभिभाषन्ते । '' औ.वि.च.व्या. पुट.१८१

मादृशास्तु - भवेतिनामधेयं नितरामेवात्रोपयुक्तं यतोह्यनेन जगज्जनकवासनाधिवर्धकस्य काममृतशरनिपातस्याक्षय्यादपराधत्वं विद्यते, येन च जगत्पितुरपि नेत्रात् सहजसुलभवात्सल्यमपेक्ष्य वह्नेरेवाभूत्प्रादुर्भाव इत्यभिप्रायाय विशेषावबोधो जायते, हरेति नामकरणेन नैवं समुपपद्येतेत्युपयुक्तमेव भवनामकरणमित्यामनन्ति ।

वस्तुतस्तु - साधरणतयात्र संहारस्यैवावसर इति भवेत्यभिधानम् अनौचित्यं व्यञ्जयत्येवेति सुधियो विभावयन्तु ।
रसौचित्यं विवृण्वन्नवदत् क्षेमेन्द्रः -

In Public domain, Digitization Muthulakshmi Research Academy


(६) कुर्वन् सर्वाशये व्याप्तिमौचित्यरुचिरो रसः ।
मधुमास इवाशोकं करोत्यङ्कुरितं मनः ॥ इति

तत्र कालिदासश्लोकमनौचित्यस्य उदाहरणतया दत्तवान् सः श्लोकः अयम्

(७) वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गन्धतया स्मचेतः । ७
प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः ॥
औ.वि.च.पुट ४५(कुमारसम्भवम् ३ स, २८ श्लो)

क्षेमेन्द्रण वृत्तावेवमुक्तम् - '' अत्र केवलकर्णिकारकुसुमवर्णनमात्रेण विधातृवाच्यगर्भेणैव प्रस्तुतश्रृङ्गारानुपयोगिता तदुद्दीपनविभावोचितं न किञ्चिदभिहितम् । इति । एवं माघस्याप्यनौचित्यमभिहितम् '' तद्यथा - तत्त्वौचित्यं दर्शयन्नाह क्षेमेन्द्रः -

(८) काव्यं हृदयसंवादि सत्यप्रत्ययनिश्चयात् ।
तत्त्वोचिताभिमानेन यात्युपादेयताम् कवेः ॥८ इति।औ.वि.च.का.३०

तत्त्वानौचित्यस्य माघश्लोकः उदाहृतः ।

तदित्थं -

बुभुक्षितैः व्याकरणं न भुज्यते न पीयते काव्यरसः पिपासितैः ।
न विद्यया केनचिदुद्धृतम् कुलं हिरण्यमेवार्जय निष्फलाः कलाः ॥

क्षेमेन्द्रेण अत्रैवं वृत्तिर्लिखिता - '' अत्र अयथार्थार्थितापरत्वेन धनमेवार्जय, क्षुधितैः व्याकरणं न भुज्यते, न च काव्यरसः पिपासितैः पीयते, न च विद्यया कुलं केनचिदुद्धृतमित्युक्ते सर्वमेतत् दारिद्र्यदैन्यविद्रुतकातरतया तत्वविरहितं विपरीतमुपन्यस्तमनौचित्यसंयुक्तमेव । विद्यानामेव सर्वसम्पत्प्रसविनीनां क्षमत्वं नान्यस्य ''। इति । अनेन ज्ञायते क्षेमेन्द्रस्य विमर्शनसाहसं यत् महाकवी कालिदासमाघावपि अनेन न गणिताविति ।
औ.वि.च. पुट - १४९

**मङ्गलश्लोकः -**

प्रतिपाद्यविषयस्य अनुरूपामेव प्रार्थनां ग्रन्थादौ न्यबध्नात् क्षेमेन्द्रः । श्लोकः एवं भवति -

कृतारिवञ्चने दृष्टिः येनाञ्जनमलीमसा ।
अच्युताय नमस्तस्मै परमौचित्यकारिणे ॥ इति । औ.वि.च.-१श्लो

In Public domain. Digitization Muthulakshmi Research Academy

अरिवञ्चनविषये अर्थात् शत्रुप्रतारणे नाम समुद्रमन्थनोपलब्धामृतवितरणकार्ये नेत्रयुगलम् अञ्जनमलिनं कृतं नारीभूत्वा सः शत्रून् प्रतारयामास। तादृशाय औचित्यकारिणे अच्युताय = औचित्यात् च्युतिरहिताय नमः इति। एवम् औचित्यकृते नमस्कारः अस्मिन् ग्रन्थे आदौ निबद्धः इति नितरामौचित्यं भजते।

**औचित्यस्य काव्यजीवितत्वप्रतिपादनम्** - कण्ठोक्त्या क्षेमेन्द्रः औचित्यस्य काव्यजीवितत्वं प्रत्यपादयत्। सः वदति -

(९) काव्यस्यायमलङ्कारैः किं मिथ्यागणितैर्गुणैः।
यस्य जीवितमौचित्यं विचिन्त्यापि न दृश्यते॥ इति।
औ.वि.च.४श्लो

व्यतिरेकमुखेन औचित्यस्य काव्यजीवितत्वप्रतिपादनपरोऽयं श्लोकः। काव्यस्य जीवितभूतमौचित्यं नास्ति चेत् नालङ्कारैः नापि गुणैः किञ्चिदपि प्रयोजनम् इति तस्य भावः। अपि च तेन -

(१०) अलंकारास्त्वलंकाराः गुणा एव गुणास्सदा।
औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्। इत्यापि उक्तम्।
औ.वि.च.५श्लो

व्याख्यातोऽयं श्लोकः तेनैव तत्रैव '' परस्परोपकारकरुचिरशब्दार्थरूपस्य काव्यस्य उपमोत्प्रेक्षादयः ये प्रचुरालंकाराः ते कटककुण्डलकेयूर-हारादिवदलंकारा एव। बाह्यशोभाहेतुत्वात्। येऽपि काव्यगुणाः केचन तल्लक्षणविचक्षणैः समाम्नातास्तेपि श्रुतसत्यशीलादिवत् गुणा एव, आहार्यत्वात्। औचित्यं तु अविनश्वरं जीवितं काव्यस्य, तेन विनास्य गुणालंकारयुक्तस्यापि निर्जीवत्वात् '' इति। औचित्यस्य परिपालनेनैव काव्यतत्त्वानां परमार्थता सिद्ध्यतीति क्षेमेन्द्रेण प्रतिपादितम्-तद्यथा -

(११) उचितस्थानविन्यासादलंकृतिरलंकृतिः।
औचित्यादच्युता नित्यं भवन्त्येव गुणागुणाः॥ औ.वि.च.- ६ श्लो

अलंकृतिरुचितस्थानविन्यासादलंकर्तुं क्षमा भवति, अन्यथा त्वलंकृति-व्यपदेशमेव न लभते। तद्वदौचित्यादपरिच्युता गुणा गुणतामासादयन्ति, अन्यथा पुनरगुणा एव। यदाह -

In Public domain. Digitization Muthulakshmi Research Academy



(१२) कण्ठे मेखलया नितम्बफलके तारेण हारेण वा,
पाणौ नूपुरबन्धनेन चरणे केयूरपाशेन वा ।
शौर्येण प्रणते, रिपौ करुणया नायान्ति के हास्यता,
मौचित्येन विना रुचिं प्रतनुते नालंकृतिर्नोगुणाः ॥ औ.वि.च.६श्लो

**क्षेमेन्द्रेण औचित्यलक्षणमेवमुक्तम् -**

(१३) उचितं प्राहुराचार्याः सदृशं किल यस्य यत् ।
उचितस्य च यो भावः तदौचित्यं प्रचक्षते ।। इति। औ.वि.च.७का

**मूलं स्रोतः** - क्षेमेन्द्रात् पूर्वतनैराचार्यैः औचित्यविषये किञ्चिदुक्तमेव । तत्र नाट्यशास्त्रकारेण भरतेन नटवेषविषये उक्तम् -

(१४) अदेशजो हि वेषस्तु न शोभां जनयिष्यति ।
मेखलोरसि बन्धे च हास्यायै वोपजायते ॥ इति ।

नाट्यशास्त्रम् - १४ - ६८

एतदेव वस्तुतः कण्ठे मेखलया इति पद्यस्य मूलं भवेत् ।
आनन्दवर्धनेन बहुविधौचित्यानि महता प्रबन्धेन निरूपितानि विद्यन्ते ।
तेनोक्तम् -

**अलंकारौचित्यम् -**

(१५) रसभावादितात्पर्यमाश्रित्य विनिवेशनम् ।
अलंकृतीनां सर्वासामलङ्कारत्वसाधनम् ॥ ध्व.आ.-द्वि.उ

**वर्णौचित्यम् -**

(१६) शषौ सरेफसंयोगो ढकारश्चापि भूयसा ।
विरोधिनः स्युः शृङ्गारे तेन वर्णाः रसच्युतः ॥
त एव तु निवेश्यन्ते बीभत्सादौ रसे यदा ।
तदा तं दीपयन्त्येव तेन वर्णा रसच्युतः ।। ध्व.आ.-तृ.उ,३,४कारिका

**संघटनौचित्यम् -**

(१७) गुणानाश्रित्य तिष्ठन्ती माधुर्यादीन् व्यनक्ति सा ।
रसांस्तन्नियमे हेतुरौचित्यं वक्तृवाच्ययोः ॥
विभावानुभावसञ्चार्यौचित्यचारुणः ।
विधिः कथाशरीरस्य वृत्तस्योत्प्रेक्षितस्य वा ॥

In Public domain. Digitization Muthulakshmi Research Academy


इतिवृत्तवशायातां त्यक्त्वाननुगुणां स्थितिम् ।
उत्प्रेक्ष्याप्यन्तराभीष्ट रसोचितकथोन्नयः ॥ ध्व.आ-तृ.उ,१०,११.का

वृत्त्यौचित्यम् -

(१८) रसाद्यनुगुणत्वेन व्यवहारोऽथ शब्दयोः ।
औचित्यवान् यस्ता वृत्तयो द्विविधाः स्थिताः ॥ ध्व.आ-तृ.उ,३३ का

(१९) वाच्यानां वाचकानां च यदौचित्येन योजनम् ।
रसादिविषयेणैतत् मुख्यं कर्म महाकवेः ॥ ध्व.आ-तृ.उ, ३२ का

इत्यादिकं यत् तदेव आधारीकृत्य क्षेमेन्द्रेण एष ग्रन्थः लिखितः इति वक्तुं शक्यते । एवमेव - अनौचित्यविषये आनन्दवर्धनेन यदुक्तम् -

(२०) अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् ।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा ॥ इति । ध्व.आ - तृ.उ.

तदेव क्षेमेन्द्रस्य औचित्यविषये महतीं चिन्तनधारामजनयत् इति वक्तुं शक्यते ।

अत्रैते विषयाः संक्षेपेण साररूपतया स्मरणीयाः भवन्ति ।

१. अस्य ग्रन्थस्य मूलं स्रोतो भवति आनन्दवर्धनस्य ध्वन्यालोकः एव । क्षेमेन्दद्रेण आनन्दवर्धनः कुतो न स्मृतः अस्मिन् विषये इति विचारणीयमेव । परन्तु अन्यत्र क्षेमेन्द्रेण आनन्दवर्धनः स्मृतः क्षेमेन्द्रेणोक्तम् - तदुक्तमानन्दवर्धनेन -

(२१) विरोधी वाविरोधी वा रसोऽङ्गिनि रसान्तरे ।
परिपोषं न नेतव्यः तेन स्यादविरोधिता ॥ इति । औ.वि.च.पुट.८६

In Public domain. Digitization Muthulakshmi Research Academy



२. सप्तविंशति औचित्यानि अनेन उदाहृतानि, ततोऽप्यधिकतया सन्त्येवेति तेनैवोक्तम् -

(२२) अन्येषु काव्याङ्गेष्वनयैव दिशा स्वयमौचित्यमुत्प्रेक्षणीयम् ।
तदुदाहरणान्यानन्त्यात् न प्रदर्शितानीत्यलमतिप्रसङ्गेन ॥ इति ।
औ.वि.च.का.३९.पुट.१८७

३. अनौचित्यमपि क्वचित् गुण एव भवतीति अनेन न प्रतिपादितम् ।

४. अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् ।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा ॥ इति आनन्दवर्धनकारिका अपि अत्र न स्मृता ।

५. ग्रन्थोऽयम् पूर्वपक्षराद्धान्तखण्डनमण्डनादिकं विना सरलया सरण्या प्रवृत्तः ।

इति शम्

उपयुक्तग्रन्थः

१. क्षेमेन्द्रलघुकाव्यसंग्रहः संस्कृतपरिषद् ,
उस्मानियाविश्वविद्यालयः ,
हैदराबाद् - ५०० ००७ ,
द्वितीय मुद्रणम् - २००९

In Public domain. Digitization Muthulakshmi Research Academy

# ३. सेव्यसेवकोपदेशः

— वि.ए.कुमारस्वामी Ph.D

अत्र भवान् क्षेमेन्द्रः रचनाव्यासङ्गजुषां क्षेमसंवर्धको महेन्द्रः वरीवर्ति । स्वरचितग्रन्थैः मादृशानां कवीनां मार्गदर्शको विराजते । तथाहि :- औचित्यविचारचर्चादिकं पठित्वा मद्रचितश्रीलहरी कृपालहरीनाम्नि तेलुगुपद्यकाव्ये षष्टिं पद्यानि निरस्य मुद्रणाय नाददाम्। परस्तात् चिन्त्यमाने, यानि मया निरस्तानि पद्यानि, तादृशानि संस्कृतसाहित्ये अन्यत्र च चिरस्थायीनि दृष्टानि ।

अस्तु । एतेन चात्र भवतः साहित्यविमर्शधोरणी अनुत्तमां श्रेणिमधिरोहति अपि च साहित्यशास्त्रे विविधकाव्यात्मसिध्दान्ताविरोधिनी चकास्तीति निश्चप्रचमेव वचो विदुषां पुनरुदीरयामः ।

आस्तां तावत् सर्वमेवेदम् । प्रस्तुतः सेव्यसेवकोपदेशः अस्मिन् प्रजातन्त्रयुगे कथमुपकारको भवतीति विस्मितो भवामि । पुरातनशुक्रनीतेः कौश्चन श्लोकौ स्मृतिपथमारोहतः, तद्यथा :-

श्लो. ये भृत्या हीनभृतिकाः, शत्रवस्ते स्वयंकृताः
परस्य साधकास्ते तु छिद्रकोशप्रजा, हराः
वाक्पारुष्यान्न्यूनभृत्यः स्वामी प्रबलदण्डतः
भृत्यं प्रशिक्षयेन्नित्यं शत्रुत्वं त्वपमानतः — इत्यादीनि

उपदेशवचनानि, न, मन्ये प्रायशः अद्यतनप्रजातन्त्रयुगे आवश्यका- नीति, यतो हि सर्वकारसेवायां श्रमं विना सेवकाः प्रभूतं धनमर्जयन्ति, विना याचनां, प्रतिसंवत्सरं वेतनवृध्दिः जायते, सेव्यस्य वचनं न मानयन्ति, सेव्यांश्च कथञ्चित् कार्यनिर्वहणं कुर्वन्तः सीदन्ति । बहुवर्षपर्यन्तम् केन्द्रीय- विद्यालयेषु प्रांशुपालपदवीं निरुह्य विश्रान्तस्य मम मनसि, कौतुकं जातं यत्, क्षेमेन्द्रस्यायमुपदेशः अद्यतनसमये प्रासङ्गिकः भवितुमर्हति वा नेति ।

In Public domain. Digitization Muthulakshmi Research Academy


क्षेमेन्द्रस्य समये यादृशी राष्ट्रपरिस्थितिः आसीत् तादृशी अद्य भवति चेत् , तस्योपदेशः फलेग्रहिः भवेत् नाम । तर्हि किं कार्यम् ? क्षेमेन्द्रस्य देशकालप्रजापरिस्थितिं मनसि निधाय, आधुनिकसमाजस्थितिगती च परिगणय्य सामान्यांशानादाय तद्यश प्रजातन्त्रयुगे तेषामुपयोगः कथं भवेदिति चिन्तनं युज्येत ।

आधुनिककाले, सरोवराणां पद्मानां च बहुत्र अदृश्यत्वेऽपि पुराकविरचितकाव्यवर्णनानि आस्वाद्य यथा सहृदयाः पाठकाः मोदन्ते, तथा क्षेमेन्द्रस्य सेव्यसेवकोपदेशमपि समीचीनं मत्वा, तस्य काले सेवापरिस्थितिश्च श्लाघनीयेति मत्या, वयं यदि सन्तुष्यामः, तर्हि तत् न समञ्जसम् । क्षेमेन्द्रस्य असन्तोषः सेवकानां स्थितिगतिविषये सुस्पष्ट इति हेतोः, तं च हेतुमन्तरा सेव्यसेवकयोः उपदेशं कर्तुं कविः नैव उद्युक्तो भवतीति वेदितव्यम् ।

तथाहि - सेवकानां दुस्स्थितिं स्मारं स्मारं, क्षेमेन्द्रः अवश्यं तेषां क्षेमविधानाय किमपि शासनं कर्तव्यमिति मन्वानः दरीदृश्यते । पश्यत, द्वितीयं श्लोकम् ।

श्लो. उत्सृज्य निजकार्याणि सद्भिः बाष्पाकुलेक्षणम्
सेव्यसेवकसेवानाम् क्रियतामनुशासनम् ॥

अतिदयनीया सेवकानां स्थितिः, क्षेमेन्द्रस्य समये आसीदिति अनेन विस्पष्टम् । एकषष्टिपरिमितेषु श्लोकेषु भृत्यानां क्लेशकलुषितामवस्थां प्रायः चत्वारिंशता श्लोकैः सेवावृत्तिमतां वर्णयति तत्र भवान् । वर्णनं च तृष्णानिरसनद्वारा आलङ्कारिकरीत्या भवति, न तु वाच्यप्राधान्येन साक्षात् । तथा च क्षेमेन्द्रस्योपदेशः अपि व्यङ्ग्य एव भवति, न तु वाच्यः । सेवकानामीदृशीं कष्टदशां शासकाः जानीयुरवश्यमिति हितोपदेशः, सेव्यानां श्रोत्रयोः लगतुतरामिति क्षेमेन्द्रस्याक्रन्दनमिति प्रतिभाति ।

अपि च बहुवारं तृष्णाक्षयसुखश्लाघया सेवापरायणानां च कृते उपदेशः दीयत एव ।

एवं प्रकारे सेव्यसेवकोपदेशे बहुश्लोकगतानलङ्कारान् वर्णयन् तद्विदां सहृदयानां बहुमूल्यं समयमौत्सुक्यरहितं विधातुं नेच्छामि । ईदृशेषु

In Public domain. Digitization Muthulakshmi Research Academy

उपदेशात्मकग्रन्थेषु उद्दिष्टः आर्थिकांशः प्रधानो भवति, शैलीगतगुणालङ्कार विमर्शापेक्षया ।

स चायमुपदेशः अद्यतनसमाजे उपयोगी वा ने ति विचारश्च तदपेक्षया प्रधानतरो भवति । तदर्थं कृते च उपक्रमे, कतिपयश्लोका एवोद्ध्रियन्ते, येभ्यः सार्वजनिकः सार्वकालिकः हितोपदेशः उपलब्धो भवति । तथाहि :-

ऊनपञ्चाशत्तमे श्लोके अनुत्तमः उपदेशः लभ्यते, यं गृहित्वा शासकाः अर्थात् सेव्याः, सेवकानामादरपात्रतां भजन्ते । परिजनेषु स्नेहं विदध्यात् सेव्यः, येन सरसतया क्लेशं विना, सेवकाः स्वकर्मनिर्वहणे अनुरक्ता भवेयुः । स्नेहश्च सेवकानां गुणपरिज्ञानमुखेन समुचित समयेषु तत्कृतसत्कर्मप्रशंसामुखेन च प्रकटितो भवति । स्नेहं विना केवलं विधिविधानपरिपालनवशात् अविश्रान्तः सेवकवर्गः, वेतने लब्धेऽपि खिन्नो भवति, स्वामिनि च गौरवबुध्दिं, न, वहति । तत्र श्लोकश्चैतादृशः श्रूयताम् :-

श्लो. प्रम्लाना सरसत्वमेति न पुन,र्मालेव, लग्नातपा
भग्ना काचमयीव, सन्धिघटनायोगेन न श्लिष्यति ।
सेवा, दीपशिखेव, दुर्गतगृहे, सन्धार्यमाणा परम्
निस्स्नेहा क्षयमेति, खेदजनितैरुच्छ्वासमालानिलैः ॥

अत्र श्लेषोपमाव्यतिरेकालङ्कारैः सम्पादितया चारुतया साकं, प्रेमभरितेन सौहार्देन केवलं मनुष्यः वास्तविकं तोषमेति, निरन्तरकठिनदण्डेन कार्यनिर्वाहे सत्यपि, खिन्नेभ्यः सेवकेभ्यः समधिकं चिरकालं कार्याणि सफलानि नाधिगन्तुं प्रभवत्यधिकारी इति समुचित उपदेशः दीयते तत्र भवता । ईदृशश्चोपदेशः सार्वकालिको भवितुमर्हति । अपि च त्रयोदशश्लोकः अविस्मरणीयो भवति, तद्यथा :-

श्लो. अकालागमनक्रोधविधुरेश्वरचक्षुषा ।
क्षिप्रं स्मर इवायाति सेवको दग्धभूतिताम् ॥

यथाकालागमनं कार्यालयेषु अत्यांवश्यकमेव, किन्तु तस्य व्यतिक्रमे, तेनैव हेतुना, सेवकस्य जीविकाभङ्गः माभूत् अर्थात् पदवीतः

In Public domain. Digitization Muthulakshmi Research Academy


निष्कासनं न, स्यादिति सेवकानां पक्षमादाय क्षेमेन्द्रः तेषां क्षेमाय प्राड्विवाकः इव नीतिमुपदिशति । कीदृशीं नीतिमित्युक्तौ तेलुगुभाषायां लोकोक्तिः स्मृति पथमारोहति । केयं लोकोक्तिरित्युक्तौ '' यदि सेवकः अपराध्यति, तर्हि पृष्ठताडनं भवतु, न तु कुक्षिस्फोट '' इति । तथा च, सेव्येन दयावता भवितव्यम्, मृदुलसमुचितदण्डः यत्रापेक्ष्यते, तत्र तीक्ष्णतरकशाघातः न भवेदिति उपदेशः आविष्क्रियते ।

अपि च सप्तमः श्लोकः चिन्तनीयो भवति, प्रभुपदस्थायिभिः मानवैः ।

श्लो. दूरं हुङ्कारमात्रेण विसृष्टो मार्गणस्सदा ।
गुणभ्रष्टः क्रियाहीनः नोद्वेगं यति सेवकः ॥

श्लेषालङ्कारमनोहराणां श्लोकानां मध्ये अयमप्यन्यतमः । सेव्यस्य मनोऽभिलषितसेवा एव गुणः, इति सेवकः जानीयात् । तादृशात् गुणात्, यदा भ्रश्यति तदा, भृत्यस्य मार्गणस्य अर्थात् याचकस्य गतिर्भवति । यदा गुणेन सम्बध्दः, लक्ष्यं साधयति, तदा मार्गणः नाम बाणः भवति कर्मकरः । '' गुणच्युतिः नो भवतु तव, मार्गणत्वं याचकरूपेण नैव भवतात् तव, जागरूको भूयाः '' इति सेवकानां क्षेमायोपदेशः क्रियते । नोद्वेगं याति सेवकः इति निर्लज्जत्वं तस्य विदित्वा सेव्यः सेवकस्य लोपः भविता इति पुरत एव विजानीयादिति उपदेशः व्यज्यते ।

द्विचत्वारिंशत्तमश्लोकः अधिकारिणः सेव्यान् कटाक्षलक्ष्यान् विदधातीव, पश्यन्तु सहृदयाः :-

श्लो. धूमायमानः असिविपक्षभूतः, चाटुक्रमोत्पादितकर्णशूलः ।
कुसेवकः पादतलेऽवलग्नः पदे पदे कण्टकतामुपैति ॥

पदे पदे वेधबाधां जनयन् , कण्टकः कदाचिदवश्यं निष्कासनीयः एव भवति, तथैव निरन्तरपीडाकरः निरुपयोगः सेवकः निन्दनीयः, अर्धचन्द्रप्रयोगेण तस्य बहिष्कार एव वरीयानित्यत्रोपमया ध्वन्यते ।

'' श्ववृत्तिः नीचसेवनम् '' इति मनुस्मृतौ यदुक्तं, तस्य निन्दा द्विपञ्चाशत्तमश्लोके, रमणीयवर्णननिपुणेन तत्र भवता प्रस्तुता शार्दूलविक्रीडितेन, श्रूयतां तावत् :-

In Public domain. Digitization Muthulakshmi Research Academy

श्लो. व्यर्थात्यर्थगतागतव्यतिकरैरश्रान्ततीव्रज्वरः ।
द्वारालोकनतत्परः, परिजनैरुत्सार्यमाणः परम् ॥
यत्नेनैव पुनः प्रवेशकलनैः, क्लेशावमानाश्रयः ।
सर्वापत्पिशुनः शुनस्सदृशता मालप्स्यते, सेवकः ॥

'' लाङ्गूलचालनमधश्चरणावपातं भूमौ निपत्य वदनोदरदर्शनं च, श्वापिण्डदस्य कुरुते '' इति भर्तृहरिणा कृतं वर्णनं स्वभावोक्तिचारुतां वहति अस्मिन्नेव प्रसङ्गे । अस्तु ।

भर्तृहरिर्वा क्षेमेन्द्रो वा वेदव्यासो वा '' तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः '' इत्येव उपदेशं ददाति । अतो विशिष्य, सेव्यसेवकोपदेशेऽपि तृष्णागर्हणद्वारा '' सन्तोषं एव पुरुषस्य परं निधानम् '' इत्येव प्रधान तरः अंशः नूनं भवति । तथाहि - इदं विमृश्यते यत् तृष्णापरवशो जनः सेवानिरतो भवाति, वस्तुतः स एव दरिद्रः यत आत्मानं दरिद्रं मत्वैव, सेवको भवति, '' स तु भवति दरिद्रः यस्य तृष्णा विशाला, मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः '' इत्यादि वचनानि अनुचिन्तनीयानि । अस्योपदेशस्य शीर्षकम् '' तृष्णागर्हणम् '' अथवा '' सेवागर्हणम् '' इति कल्पितमभाविष्यत् क्षेमेन्द्रेण । सेव्यः अपि स्वापेक्षया उन्नताधिकारिणां सेवकः भवति, सेवकस्याप्यनुचरा भवन्त्येव । तस्मात् सेवकः सेव्यस्य क्लेशं जानीयात्, ज्ञात्वा प्रवर्तेत इति सेव्यसेवकोपदेशपदेनैव ज्ञाप्यते । उपदेशश्चोद्दिष्टः तत्र भवता साक्षात् धर्मशास्त्रे इव न क्रियते, किन्तु सेवकस्य वर्णनेन सेव्यस्य च वर्णनेन । तस्मात् परोक्ष एवोपदेशः क्षेमेन्द्रेण कृतः ।

साक्षाच्च तृष्णागर्हणेन, शमस्य प्राधान्यमाविष्कृतम्, तथाहि :-

२६. श्लो. सेवासंक्षपिताङ्गानां राजरथ्यासु शुष्यताम् ।
तीव्रतृष्णाविषार्तानां शरणं शमवारिदः ॥

अस्मिन् वर्तमानव्यावहारिक भारतदेशसमाजस्थितौ को नाम तृष्णागर्हणं श्रृणुयात् इत्यस्माभिः नैव चिन्तनीयम् । अतितृष्णापरवशाः भारतीयाः अमेरिकादिपाश्चात्यदेशानाश्रयन्ति तत्रैव निवसन्ति, अद्यत्वे

In Public domain. Digitization Muthulakshmi Research Academy


बहवस्तादृशा बहिष्कृता इति च हेतोः क्षेमेन्द्रस्योपदेशः आधुनिकसमये अत्यावश्यक एव, इति वक्तव्यम् ।

अपि च उक्तानुक्तविचारपरायणेन मया, एवं चिन्त्यते यत्

श्लो. सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ॥
अन्यस्य चित्तमभिसञ्चरेण्यम्, उताधीतं विनश्यति ।
परेङ्गितज्ञानफला हि बुध्दयः, स्वसिध्दये पराक्षेपः ॥

परार्थं स्वसमर्पणम् इत्यादीनि सुभाषितानि आकलय्य सेवायाः अथवा सेवकस्य प्रशंसापि करणीया । सेवां विना, न कुत्रचित् किंचिदपि सिद्धयति ।

किञ्च मयेदमुच्यते यत् श्लो. '' यावत् स्थास्यन्ति गिरयः सरितश्च महीतले, तावत् सेव्यस्य भृत्यस्य, सम्बन्धः निश्चलःखलु ''यदि सेव्यसेवकभावः स्वामिभृत्यभावः पोषकपोष्यभावः भर्तृभार्यभावः स्वाधीनपराधीनभावः प्रवरावर भावः विधायकविधेयभावः अस्तमियात् तर्हि जगति द्वैतमेव नश्यति, यदि द्वैतं नश्यति, तर्हि जगद्विलय एव विनिश्चितः । मानवानां प्रवृत्तौ, कश्चित् वक्ता अन्यश्श्रोता भवति अर्थात् कश्चित् उपदेष्टा भवत्यपरश्च कार्यकर्ता । यः कार्यकर्ता, स उपदेश कर्तुः वचनं मानयेत्, यश्चोपदेशकः स कार्यकर्तारं मानयेत् । इदमप्यवगन्तव्यं यत्, कदाचित् अथवा आवश्यकतानुसारेण कार्यकर्ता अपि उपदेशं दद्यात्, उपदेष्टापि कार्यं कुर्यादेव । उभयोः एकस्मिन्नेव कार्ये समाविष्टत्वात्, परस्परहितैषित्वमनिवार्यम् । अयमभिप्रायः सेव्यसेवकयोः मतौ निवेशनीयः ।

एवं विचार्य मया सप्तश्लोका विरचिताः । तान् सन्तः श्रोतुमर्हन्ति सदसद्व्यक्ति हेतवः । तथाहि :-

श्लो. कदाचित् सेवकः सेव्यम् ज्ञापयेत् मन्त्रिवद् नृपम् ।
सेव्यश्च बोधयेत् भृत्यम् कर्तव्यज्ञानसिध्दये ॥

श्लो. साध्यसाधकभावश्च बोध्यबोधकतां भजेत् ।
बोध्यबोधकभावश्च कार्यसाधकतां व्रजेत् ॥

In Public domain. Digitization Muthulakshmi Research Academy

श्लो. प्रयोजनं च विविधं संस्थाभेदेन भिद्यते ।
तथापि चैकमत्येन कार्यसिध्दिः प्रयोजनम् ॥
श्लो. संस्थाया अङ्गिता तद्वत् नेतुः प्राधान्यलक्षणा ।
सेवकानां चाङ्गभावः संस्थानां वृध्दिकारकः ॥
श्लो. सेव्यश्च ज्ञापयेत् भृत्यान् आदौ नित्यं पुनःपुनः ।
सेवकाः कार्यकर्माणि स्वयं कुर्युः परायणाः ॥
श्लो. ततः परं स्वामिनश्च ज्ञापनेऽभ्यर्हिताः परे ।
सेव्यसेवकयोर्मध्ये यावत् संसक्तिरिष्यते ॥
श्लो. तावत् भारतदेशस्य पालनं सम्यगूह्यते ।
क्षेमेन्द्रस्य प्रबन्धश्च क्षेमसन्धायको भवेत् ॥

अपि च अनुबन्धचतुष्टयमपि संयोजितं मया, तथाहि :-

अधिकारी - यः सेवकत्वेन कर्तव्यनिर्वहणमकरोत् सम्यक् स एव सेव्यः अधिकारी भवितुमर्हति, किञ्च तादृश एव क्षेमेन्द्रकृतलघूपदेशविशेषाध्ययनाय योग्यः भवति ।

सम्बन्धः - बोध्यबोधकभावः एकस्मिन्नेव लक्ष्ये सेव्यसेवकयोः सहचारिभावसहकृतः ।

विषयः - संस्थाभेदेन भिन्नोऽपि समानलक्ष्यभाव एव विषयः साध्यभावमापद्यते ।

प्रयोजनम् - सेव्यसेवकयोः मिथः ऐकमत्येन कार्यसाधनम् ।

तथैवानुक्तविचारप्रसङ्गे सेवाधर्मः परमगहनो योगिनामप्यगम्यः - इति भर्तृहरेः वाक्यं जिज्ञासां जनयति, कथं योगिनामगम्यः इति ? मयात्वेवं विचिन्त्यते :-

मौनान्मूकः प्रवचनपटुः वाचको जल्पको वा
धृष्टः पार्श्वे वसति, नियतं दूरतश्चाप्रगल्भः
क्षान्त्या भीरुः, यदि न सहते प्रायशो नाभिजातः ।

इत्यादि परस्पर विरोधिव्यवहारेषु, स्वीयव्यक्तित्वाभिमानं पौरुषमह ङ्कारं च परित्यज्य, यः शमगुणेन सहनमवलम्बते, स ध्रुवं योगी भवत्येव । स्वीयविचारानुसारेण इष्टमनिष्टं वा न भावयति यः, सः आत्मवेत्ता

In Public domain. Digitization: Muthulakshmi Research Academy



किं न स्यात् ? मन्ये अत एवोक्तम् श्रीमद्भगवते :- " सेवावृत्त्या आशु तुष्यत्यधोक्षजः " इति । सेवकस्य मनसि हीनभावनायाः स्थाने, यदि स्नेह भावना जागर्ति, तदा कष्टसहिष्णुः सेवकः सन्तोषमेव विन्देत् । अस्यां दिशि श्रीमतः क्षेमेन्द्रस्य षट्त्रिंशत्तमः श्लोकः उपयुक्तः स्यादेव ।

श्लो. उत्सृज्य तीव्रं विषयाभिलाषं ।
सन्तोषपोषं कुशलो भजस्व ॥
इत्यर्थ्यमानः सुखसेवया यं ।
आत्मैव सर्वं सुधियां ददाति ॥ इति ।

अन्ततो गत्वा प्रह्लादस्तुतौ श्रीमद्भागवते " न स भृत्यः स वै वणिक् " इत्युक्तम् स्मरणीयम् । भृत्यशब्दः सेवकार्थे न प्रयोक्तव्यः इति प्रह्लादराजस्य आग्रहः । यदा भृत्यः साभिलाषः भवति तदा स्वामिभृत्ययोः मध्ये अभिलाषः कामः अथवा स्वार्थबुध्दिकृतो विशेषः स्नेहस्य सौहार्दस्य च भङ्गकारी भवति । ततः प्रेमपूर्वकसेवा सकलसुखदा, आह्लादमयी च भवति । स्वसिध्दये स्वस्य भृत्यत्वस्य सिध्दये पराक्षेपः, परस्य परमात्मानः आक्षेपः आनयनं, भवति चेत्, परार्थं स्वसमर्पणमवश्यं स्यादेव । परार्थं स्वसमर्पणे विघातं या जनयति तृष्णा, तस्याः विघाताय यत्न आचरणीयः, तदर्थं च कृतबहुप्रयत्नो बभूव स्वोपदेशद्वारा तत्र भवान् क्षेमेन्द्रः ।

तृष्णाक्षयसुखे ज्ञाते जनाः, आत्मसुखपरायणाः, परार्थं स्वार्थ समर्पणं कृत्वा, लक्ष्यं साधयन्ति, अयमर्थश्च परम्परया परोक्षरूपेण, तृष्णाक्षयप्राधान्यं वर्णयता तत्र भवता सूचित एव ।

उत्तमश्रेण्यां सेवकाः प्रह्लादादयः इव स्वार्थविरहिताः स्वामिनं सेवन्ते । अथवा देशभक्त्या दयालुतया च निस्स्वार्थसमाजसेवा धुरीणाश्चाग्रश्रेणीगता एव ।

मध्यमश्रेण्यां सेवकाः परेङ्गितज्ञानफलभूतबुध्दिशालिनः सन्तः, सेव्यानां प्रभूणामादरपात्रतां भजन्ति ।

अधमाः, केवलं वेतनमात्रलालसाः विधेयतां प्रदर्शयन्ति तत्कालवर्तिनीम् । आधुनिकभारते द्रव्योल्बणत्वहेतोः दण्डनीतेः सारल्यात् च सेवकाः सेव्याश्च सन्मार्गपतिताः देशहितकारकाः प्रायशो न जायन्ते ।

In Public domain. Digitization Muthulakshmi Research Academy

तादृशानां समेषां कृते, तृष्णाक्षयसुखोपदेशः अत्यावश्यकः । स चायमुपदेशः सार्वकालिकः सर्वजनहितकारकश्च भवति । विशिष्य भारते जन्म लब्ध्वापि, भाग्यवन्तस्सन्तोऽपि, तृष्णापरवशाः दरिद्रा इव, पाश्चात्यदेशनिवासलालसाः वारं वारं क्षेमेन्द्रेण बोधनीयाः । तस्मादत्यन्तावश्यकोऽयमुपदेशः क्षेमेन्द्रस्य समेषां क्षेमाय कल्पताम् अन्ते आद्यं श्लोकं स्मरन्तः समापयामः -

विभूषणाय महते तृष्णातिमिरहारिणे
नमस्सन्तोषरत्नाय सेवाविषविनाशिने ।

इति शम्

उपयुक्तग्रन्थः

१. क्षेमेन्द्रलघुकाव्यसंग्रहः संस्कृतपरिषद् ,
उस्मानियाविश्वविद्यालयः ,
हैदराबाद् - ५०० ००७ ,
द्वितीय मुद्रणम् - २००९

In Public domain. Digitization Muthulakshmi Research Academy

# ४. क्षेमेन्द्रस्य नर्ममाला

इनगण्टि उमारामाराव

आनन्दापरपर्यायस्य परब्रह्मणः आराधनाय अक्षरमेव अक्षरं साधनम् । अतः अक्षरोपासका एव लोके धन्याः विराजन्ते । ते एव सहृदयहृदयावर्जकाः लोकहितकांक्षिणः भवन्ति । तादृशेषु विशिष्टतमः क्षेमेन्द्रः ।

यथा आनन्दवर्धनः ''काव्यस्यात्मा ध्वनिरिति '' यथा वा वामनः '' रीतिरात्मा काव्यस्य '' इति, '' वक्रोक्तिरेव काव्यजीवितमिति '' कुन्तकश्च प्रतिपादयामास तथा '' अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम् '' इति प्रतिपादयन् क्षेमेन्द्रः अपि आलङ्कारिकेषु प्रमुखं स्थानमवाप ।

प्रतिभासम्पन्नस्य क्षेमेन्द्रस्य लेखनी विश्वविख्यातान् ग्रन्थराजान् अनेकान् असृजत् । औचित्यविचारचर्चा, सुवृत्ततिलकं कविकण्ठाभरण श्चेति ग्रन्थत्रयं काव्यशास्त्रं शास्ति । एवं रामायणमञ्जरी भारतमञ्जरी, ब्रृहत्कथामञ्जरीति कृतित्रयं अस्य कवेः ख्यातिं स्थिरस्थायिनीं चकार । काश्मीरराजानां वंशावलिकीर्तनपरं राजावलिकाव्यं, दशावतारचरितं, कलाविलासः इत्यादि महाकाव्यानि नर्ममाला इत्यादि लघुकाव्यानि च कविना अनेन उपनिबद्धानि नैकानि राजन्ते ।

शृङ्गारादिनवरसेषु द्वतीयः हास्यः । तस्य स्थायीभावः हासः । नाटकादिषु नायकस्य
प्रायश : सहचरः विदूषकः भवति । सः ( नर्मसखः ) नर्म सचिव इत्यपि व्यवह्रियते । वेषभाषादिविकारैः हस्यं पोषयति । श्रीमद्रामायणे अपि मर्यादा पुरुषोत्तमः श्रीरामः श्रूर्पणखा प्रस्तावे परिहासप्रसङ्गम् अकरोत् । तत्परिहासानभिज्ञा नासिकाच्छेदम् अवाप शूर्पणखा । '' परिहासेऽप्यनौचित्यं काकतीन्द्रो न मृष्यति '' इति वदता विद्यानाथेन परिहासे अपि औचित्यपालनं प्रतिपादितम् । नर्मसु जडोऽपि श्रीमातुः

In Public domain. Digitization Muthulakshmi Research Academy


कृपया नर्मसु कुशलः भवति इति श्रीशङ्कराचार्यैः प्रत्यपादि । नर्मदा नदी भारतदेशे विख्याता राजते । लम्बोदरप्रहसनादिप्रहसनेषु परिहासस्य स्थानमद्वीतीयम् अतिमात्रञ्च । पुष्पबाणविलापः, कन्दर्पदर्पविलासः इत्यादिभाणनामकरूपकेषु श्रृङ्गारभूयिष्ठः हासः परिमितिमति (चक्रे) क्रान्तः एवं क्षेमेन्द्रस्य नर्ममालायां, रण्डा, कायस्थसुन्दरी, वेश्या, वैद्यः, पारदारिकः इत्यादिपात्रपोषणे औचित्यं चिन्त्यम् ।

यथा प्रबन्धाः सर्गैः, परिच्छेदैः अध्यायैः, प्रकरणैः इत्यादिभिः विभज्यन्ते तथा क्षेमेन्द्रस्य नर्ममाला परिहासैः विभक्ता । अत्र त्रयः परिहासाः सन्ति । प्रतिपरिहासं कैश्चन पात्रैः उपनामाङ्कितं दृश्यते । तत्र प्रथमपरिहासे (१) गृहकृत्याधिपतिः (२) चाक्रिकः पुंश्चलको वा (३) परिपालकः (४) लेखकोपाध्यायः (५) गञ्जदिविरः (६) मार्गपतिः व्यापारिको वा (७) ग्रामदिविरः (८) कायस्थसुन्दरी इति पात्राणि समुल्लसन्ति ।

द्वितीयपरिहासे (१) पारदारिकः (२) जीवनदिविरः (३) श्रमणिका (४) दारकोपध्यायः (५) मठदैशिकः (६) सभर्तृका (७) वैद्यः (८) गणकः (९) तूणरक्षकः (१०) गुरुः (११) आस्थानदिविरः (१२) अधिकरणभट्टा सात्रिका वा इति पात्राणि परिहासं जनयन्ति ।

तृतीये पुनः (१) गुरुभटाः (२) रण्डा (३) गुरुकृत्यमहत्तमः (४) वेश्या (५) चक्षुर्वैद्यः (६) शल्यहर्ता (७) वृद्धवणिक् इति पात्राणि नर्म द्योतकानि भवन्ति ।

प्रोढप्रबन्धनिर्माणदक्षस्य क्षेमेन्द्रस्य नर्ममाला तावत् , सरला मधुरा अलङ्कारभूयिष्ठा च सती सद्यः परनिर्वृतिरूपं परमं प्रयोजनं पाठकेभ्यः वितरति ।

सुन्दरकाश्मीरवासी अयं कविः काश्मीरान् अमरावतीपट्टणादपि सुन्दरान् मनुते । पश्यतु

अस्ति स्वस्तिमतामग्र्यं मण्डितं बुधमण्डलैः ।
खण्डिताखण्डलावासदर्पं काश्मीर मण्डलम् ॥ १-२ श्लो

In Public domain. Digitization Muthulakshmi Research Academy



परमशिवभक्तः अयं क्षेमेन्द्रः । अनेन अत्र असकृत् परमेश्वरः स्तुतः ।

येनेदं स्वेच्छया सर्वं मायया मोहितं जगत् ।
स जयत्यजितः श्रीमान् कायस्थः परमेश्वरः ॥ १-१
कृतविश्वप्रपञ्चाय नमो मायाविधायिने
उत्पत्तिस्थितिसंहारकारिणे पुरहारिणे ।
व्यापिने जन्महीनाय निर्गुणाय कलाभृते
सर्वाधिकारिणे सर्वकालकूटाशनाय ते ॥

अत्र सर्वपदप्रयोगात् ज्ञायते यत् न केवलं सागरमथनोद्भूतं अब्धिजं विषं, परन्तु सर्वस्मिन् अपि काले जायमानं (कूटनीतिसमुत्पन्नं) विषयविषमपि इति कलिप्रभावजान् दोषान् परिहासप्रसङ्गव्याजेन परिहर्तुमनेन कविना कृतः प्रयासः एव नर्ममालारूपेण आविरभूत् ।

नृ नये इत्यस्मात् धातोः मन् प्रत्यये कृते सति नर्मशब्दः उत्पन्नः अर्थस्तु परिहासः इति द्रव केली परिहास क्रीडा लीला च नर्म च इत्यमरः । स्त्रीपुरुषपरस्परपरिहासः नर्म शब्देन व्यवह्रियते । कामभोग कलापाः नर्मशब्दप्रतिपाद्याः भवन्ति इति व्याख्यातारः व्याचक्रुः ।

अपि सुजनविनोदायोम्भिता हास्यसिद्धयै
कथयति फलभूतं सर्वलोकोपदेशम् ॥ ३ । ११३ श्लो.

इति वदता क्षेमेन्द्रेण फलद्वयं प्रदर्शितम् सुजनविनोदः, सर्वलोकोपदेशश्च परिहासप्रियेण कविना अनेन विचित्राणि पात्राणि अपि सृष्टानि । अश्लीलकृत्यानि वर्णितानि । यथा कुमारसम्भवे अम्बा ऊरुमूले नखक्षतानि शीतलेन शिवशिरसिस्थित चन्द्रेण निरवाप, इति वर्णितं, दोषप्रकरणे निरूपितम् कविशक्त्या निगीर्णं तथा अत्रापि रण्डादिप्रकरणेषु असकृत् वर्णितमपि अश्लीलं अव्युत्पत्तिकृतः दोषो न भवति । अपि च पात्रोचितत्वात् गुणाय कल्पते । औचित्यपरिपालकः अयं कविः अन्ते नरकण्टकनाशनं, तेन च जनानां सन्तुष्टिं च वर्णयामास । एवं क्रमेण शान्तेषु नियोगिदिविराग्रिषु मोदते गतसन्तापः, सन्तोषसुभगो जनः ॥ इति ३ । ११२

In Public domain. Digitization Muthulakshmi Research Academy


## नर्ममालापात्रपरिचयः

**१. दिविरः**:- भगवता प्रभविष्णुना विष्णुना दैत्याः पुरा हताः । तदा कश्चन गेहगणना पतिः दुःखितः सन् वैतरणी तीरे दुश्चरं तपश्चतार । स्वमूत्रचलिकाहारः सन् वर्षसहस्रकं यापयामास तदा तस्य तपसा सन्तुष्टः कलिः वरदोऽभूत् कलिदत्तकलमास्त्रेण सम्पन्नः सन् जन्मान्तरे भुवि दिविरः समुत्पन्नः अभूत् । तस्य च पिता मर्मघाती सौनिकः । माता च कुद्दालक भार्या । जगदुन्मूलनव्रतः सः कलेः आशयमनुसृत्य ब्राह्मणानां वृत्तिच्छेदकः देवालायविध्वंसकश्चासीत् ।

'' जगति ब्राह्मणानां च वृत्तिच्छेदे त्वया कृते ।
यज्ञच्छेदाद् विनंक्ष्यन्ति दिवि देवा न संशयः ''।। १-१४

गोब्राह्मणेभ्यः शुभमस्तु नित्यम् इति वैदिकानुशासनस्य फलं व्यतिरेक दृष्टान्तेन वदति कविः यदि ब्राह्मणवृत्तिनाशः तदा यागादीनामभावात् देवतानाशः नाम त्यागाभावात् दैवीगुणाः लुप्यन्ति, तदा लोकस्य क्षयः इति प्रतिपादनमेव कवेः तात्पर्थम् ।।

**२. पिशुनः चाक्रिकः** :- पिशुनः नाम सूचकः चाक्रिकः नाम राशिचक्रम् आधारीकृत्य फलानि (पिशुनादि) सूचयति इति अतः चक्रेण जीवति इति चाक्रिकः इत्यभिप्रायः स्यात् राशिमार्गप्रदर्शकः अयम्

पदालग्नाशिवं देव गृहोच्चाटनचाक्रिकम् ।
सुसूक्ष्मदलविन्यास विभागोन्नतटिप्पिकम् ।।
अतसीकुसुमच्छायं मृदुस्पर्शाङ्गरक्षकम् ।
हस्ताङ्गुलीन्यस्तहैमत्रिगुणावर्तवालिकम् ।।
दूराध्वक्लमसोच्छ्वासात् कुर्वाणं विकृतीर्मुखे । १ । ४९

इति वर्णनेन सः हास्यनिलयः इति ज्ञायते ।

**३. परिपालकः** :- परिपालकस्य लक्षणं चाक्रिकेण उक्तमस्ति

अभीरुरपवादेषु निःशङ्कः पातकेषु च
तत्र तीक्ष्णो भृशं शश्वत् क्रियतां परिपालकः १ । ५५

In Public domain. Digitization Muthulakshmi Research Academy


कलौ अस्मिन्नपि काले एतादृशाः एव परिपालकाः बहुत्र दृश्यन्ते, श्रूयन्ते च । कविमुखात् साक्षात् श्रवणेन परिहासः परिमलं विकिरति । श्रूयताम् ।

स चास्ति भुवि विख्यातः कायस्थो भवता समः।
विना धनं विनायासं सर्वस्वहरणं विना ॥
ब्रह्महत्या न गण्यन्ते गोवधेषु कथैव का ।
प्रभुभक्ति कृता येन मूलादुन्मूल्यते जनः ॥
अन्येऽपि सन्ति सर्वत्र तद्विधास्तु न लभ्यते ।
नीतः स्वजनको येन निधनं बन्धने धनी ॥
यदि नाम भवत्पुण्यैः स समेष्यति मद्गिरा ।
तत् स्वगेहं निधानानां विद्धि स्वच्छन्दमन्दिरम् ॥

## नर्ममाला परिहासाः

(१) पिशुनेश्यः नमस्तेभ्यः यत्प्रसादान्नियोगिनः ।
दूरस्था अपि जायन्ते सहस्रशोत्रचक्षुषः ॥ १-५२
अत्र सहस्रशोत्रचक्षुषः नाम गूढचारिणः अनेके भवन्ति इति भावः
नियोगिप्रभुवर्णने पश्यतु हासः
योगी हरणचिन्तासु प्रयोगी भूर्जयोजने ।
वियोगी निजदाराणां, भोगी नरकसम्पदाम् ॥
नोपयोगी फलोत्पत्तौ दोषयोगी तु केवलम् ।
अशोकः सततं रोगी नियोगी जयति प्रभुः ॥ १-११९
नियोगिनः घोरकृत्याः बह्व्यः संप्रकीर्तिताः
गवां दण्डापयश्चक्रे निधनावधि बन्धनम्
का नाम गणना तस्य नृषु सर्वापराधिषु ॥ १-१२०,२

यस्य पूज्यानां साधुशीलानां देवतास्वरूपाणां गवामपि मरणान्तबन्धन - विधायिनः नियोगिप्रभोः सर्वापराधिषु जनेषु शिक्षागणना का नाम - भवति ।

In Public domain. Digitization Muthulakshmi Research Academy


**परिपालकः** सन्निपातज्वरेण उपमितः । तथा हि -

तीव्रदर्पो महाकोपः प्राणहृन्निष्प्रतिक्रियः ।
सोपद्रवः सोपतापः सन्निपात इव ज्वरः ॥ १ । ६४

एतादृशं परिपालकं वीक्ष्य जनः तं हिरण्याक्षं बुबुधे ।

काचरोऽयं हिरण्याक्षः पूर्ववैरमनुस्मरन् ।
देवानवाप्तः संहर्तुमिति तं बुबुधे जनः ॥

लेखकोपाध्यायः :-

कृशः शनैश्चराकारो धूसरः क्षुत्क्षतोदरः ।
बहुच्छिद्रशिरः शाटलडत्पर्यन्ततूस्तकः ॥ १ । ७२

एतादृशः लेखाधिकारी इति वर्णितः ।

''लेखाधिकारी निःस्वोऽपि लेखसंस्कार'' गर्वितः ।

आदौ कृशः तथापि अयं अचिरेण प्रसिद्धिं गतः पुष्टो बभूव ।

सोऽचिरेणाभवत्पुष्टः पूर्णपाणिर्मदोद्धतः ॥

एवं मार्गपतिः अपि

अथान्यशशिप्रवणः प्रवीणः ाधु लुण्ठने ।
आपत्प्रशमनं प्राप ग्रामः ास्मात् नियोगवित् ॥

इत्यादि सर्वं पठनानुपदं परिहासं जनयति ॥ एवं तस्य भार्या अपि

मिष्टभोजनसञ्जातनवलावण्यसच्छविः ।
तस्याभूत्तरुणी भार्या दिनैरप्सरसः समा ॥ १ । १०७

**ग्रामदिविरः** :- मूलदिविरं निरस्य ग्रामदिविरः पालकोऽभूत् अयं च चौर्याणां चिकित्साचतुरः । कूटकपटाक्षरकोविदः ।

स्थूलभूर्जफडत्कारस्फारवाद्यरसाकुलः ।
कर्परीच्छिद्रनिर्यात व्यावल्गिवृषणद्वयः ॥ १ । १३७

इत्यादि श्रवाणानुपदं यद्यपि हासं जनयति तथापि आलोचनामृतं न भवति इति अत्यन्तं नाद्रियते । एवमन्यत्रापि –

In Public domain. Digitization Muthulakshmi Research Academy



**कायस्थसुन्दरी** :- भूपालललना मदपूर्णा इयं कायस्थसुन्दरी, माल्यवती ताम्बूलनदलनव्रता । तस्याः सौकुमार्यवशात् हारो भारायते । हेमताटङ्कं न वल्लभम् । वणिग्वनितायोग्यां गुर्वीं कनकसूत्रिकां निन्दति सा । दर्पगिरा कस्य विस्मयः नाभवत् ।

चारुसौरभलिप्ताङ्गी न सा जग्राह कञ्चुकम् ।
दर्शयन्ती स्तनाभोगमर्धस्रस्तशिरोंशुका ।

एतादृशी सा विटानां कामवर्धनी जाता ।

शून्यां देवकुटीं गत्वा प्रसिद्धाः परदारिकाः ।
द्वित्रास्तत्सङ्गमोपायं प्रातिवेश्म्या व्यचिन्तयन् ।

अनेन तत्कालिकाः दुराचाराः, देवालयानां स्थितिः सम्यक् निरूपिताः । द्वितीयपरिहासे परदारिकप्रकरणे परदारोपसर्पणे उपायाः प्रकाशिताः ।

विवाहयज्ञतीर्थादि देवयात्रोत्सवैर्विना ।
न लभ्यते परिचयः परदारोपसर्पणे ॥

एवञ्च गृहिण्यः युवतयः तासां पतयश्च विवाहादिसन्दर्भेषु यत्नतः शीलसंरक्षणतत्पराः भवेयुः । अथवा सर्वेषां धार्मिकानां शीलसंरक्षणं मुख्यम् विशिष्य विवाहादिषु उत्सवेषु इत्युपदेशः अत्र जागर्ति । तत्र लक्ष्यमाणाः विकाराः उक्ताः ।

सुचिरं प्रेक्षणं लोलकुन्तलोत्तालनं मुहुः ।
तत्सम्बद्धाः सापदेशाः कथास्त्यागप्रकाशनम् ॥ २ । १५
भोगसौभाग्ययशसां प्रसिद्धिप्रतिपादनम् ।
मन्दमन्दं वचः स्वैरः तद्वाक्यश्रवणादरः ॥
तन्मुखन्यस्तनयनं चुम्बनालिङ्गनं शिशोः ।
शिल्पसम्पादनं चास्याः वस्त्रालङ्करणेप्सितम् ॥
जाते परिचये माल्यताम्बूलादि समर्पणम् ।
भित्तौ निपीडनं गाढं विजने परिचबुनम् ॥

In Public domain. Digitization Muthulakshmi Research Academy


गुह्यस्पर्शो रतिश्चेति शीलविध्वंसयुक्तयः ।
यथा राजकुमाराणां चौर्यादिकलानां शिक्षणे एवं वञ्चनादीनां बोधनं तथा सर्वेषां एतादृशानां बोधनं यत्नतः परिहाराय इति वेदितव्यम् ॥

**जीवनदिविरः** :- कश्चन राजवल्लभः शक्तिमान् दुर्जनसंरक्षणे ।

वाङ्मात्रेणैव नः सर्वं स रक्षिष्यति जीवनम् ।
आगारदाहिनो धेनुस्त्रीशिशुब्राह्मणान्तकाः
बहवो रक्षितास्तेन दिग्वार्तामात्रसेवकाः । २ । २८

अनेन च ज्ञायते यत् दुर्जनसंरक्षकाः राजवल्लभाः भवन्ति इति अतः राजानः, पालकाः च स्वजनवशंवदाः न भवेयुः इति ।

**श्रमणिका** :- युवतीनां कामुकानां गृहप्रवेशे निरोधः न भवति श्रमणिकायाः।

एषा श्रमणिका नित्यं कुट्टनी वज्रयोगिनी ।
या माता वश्ययोगानां जाराणां सिद्धदूतिका
नरोपपत्तिदीक्षासु, स्त्रीणां समयदेवता । २ । ३०
अरुन्धतीमपि क्षिप्रं प्रतारयति लीलया
पुराणपुंश्चली सा हि जाह्नवीं मन्यते तृणम् । १ । ३१

**मठदैशिकः** :-

स ताभिर्नर्मसोत्प्राससाधिक्षेपविडम्बनैः ।
आयास्यमानो मत्ताभिरभूत् प्रहसिताननः ॥ १ । ४९
ऋष्यशृङ्गव्रतेस्थितः सः
तासां गोष्ठीरसाभिज्ञः स्तनौ पस्पर्श पाणिना । १ । ५१
स बीजाश्व इवोत्सृष्टो बडबामण्डले युवा
सिषेवे ललनाः सर्वाः प्रोषितस्य नियोगिनः । १ । ५२
ता स्तेन जारगुरुणा कृतदीक्षा वराङ्गनाः
बभूवुः सर्वगामिन्यो निर्विकल्पव्रते स्थिताः । १ । ५४

**सभर्तृका** : इयमपि श्रमणिकादूत्या धूर्तानां स्वाधीनतां प्राप्ता - भर्तृशपने तावत् आलिङ्गने समुद्विग्ना चुम्बने वलिताननां रुन्धाना जघनस्पर्शमूरुस्वस्तिकनिश्चला गृहव्यापारखिन्नेव निद्रां चक्रे मुधैव सा इत्थं भर्तृषु अपराधाः कामुकाः वञ्चकैः वञ्चिताः भवन्ति ।

In Public domain. Digitization Muthulakshmi Research Academy


**वैद्यः** : नमो विद्याविहीनाय वैद्यायावद्यकारिणे
निहतानेकलोकाय सर्पायेवापमृत्यवे ।

इति श्लोके वैद्यः सर्पेण उपमितः परिहासं जनयति तादृशः आयुःक्षयङ्करः इति कथनं सत्यान्नापेतम् ।

नगरोत्सवयात्रासु विवाहेष्वतिभोजनात् ।
जनता याति यन्मान्द्यं तद् वैद्यस्य शनैः फलम् ॥ २ । ७५
गुह्याङ्गस्पर्शकृत् स्त्रीणां बह्वाशी जीवितापहः
नृणां त्रिदोषकृत् सत्यं वैद्य एव न तु ज्वरः ॥ २ । ७६
ज्वरः वातपित्ताश्लेष्मदोषकृत् भवति तथापि
ज्वरादपि हेयाः असह्याः दोषाः कुवैद्ये भवन्ति ।
विद्याविरहिताः वैद्याः कायस्थाः प्रभविष्णवः
दुराचाराश्च गुरवः प्रजानां क्षयहेतवः ॥ २ । ७७

इति कथनं अत्यन्तं सत्यम् ।

**गणकः** :- ज्योतिःशास्त्रगणकः अपि अपण्डितश्चेत् वर्षाणावर्षणज्ञान बोधका धीवरा भवन्ति इत्युपहासः,

ज्योतिःशास्त्रविदे तस्मै नमोऽस्तु, ज्ञानचक्षुषे ।
वर्षं पृच्छत्यवर्षं वा धीवरान् यो विनष्टधीः । २ । ८२
साधारणज्ञानमान्त्रवैद्यकमिश्रितं ज्योतिःशास्त्रं
विगणयन् गणकः जडाशयान् जनान्
मष्णाति इति प्रस्फुटं अवोचत् कविः ॥

**गुरुः** : नमस्ते गुरुनाथाय धनदारापहारिणे
क्षोभिणे सर्वभक्षाय यक्षायेव क्षपाशिने । २ । १०३
गुरुर्गुरुतराविद्यावद्यमदान्धधीः
अहङ्कार इव कारमागतः प्रत्यदृश्यत । २ । १११
आकारेण गुरुः गुरुश्च वचसा कौसीद्यमौर्ख्यैर्गुरुः
मेढ्रेणातिगुरुः तथास्य कुहरश्मश्रूदरस्फ्रिग्गुरुः
वेश्याकामिनियोगिवञ्चनगुरुः, सद्वृत्तशून्योगुरुः
चित्रं सर्वगुरुः शिवोदितमहाशिक्षासु नित्यं लघुः ॥१ । ११२

**आस्थानदिविरः :-**

कलमाङ्कितकर्णेन भूर्जपत्रकपाणिना
आस्थानदिविरेणेयं ग्रस्ता भगवती मही ।
मिथ्या महावराहेण दैत्येष्वाडम्बरः कृतः
आस्थानदिविरैर्ग्रस्ता यदियं नोद्धृता क्षितिः ॥१ । १२१

**अधिकरणभट्टा सात्रिकाः :-**

पश्यन्नन्धो वदन्मूकः शृण्वंश्च बधिरोऽधमः
उत्कोचेन विना भट्टश्चिरं निद्रायते शठः ।२ । १४०
उत्कोचभक्षणं छिद्रशिक्षणं साधुतक्षणम्
शटिसन्धुक्षणं कूटरक्षणं भट्टलक्षणम् ॥ २ । १४१

**रण्डा :-**

विस्तीर्णश्रोणिपुलिना पीवरोरुकुचस्थली ।
हरिणीहारिनयना रण्डा नेत्ररसायनम् ॥ ३ । २४
रण्डा स्कन्धद्वयासक्तमुक्तकेशी विराजते ।
नेत्रोत्पलमुखाम्भोजभृङ्गव्याप्तेव पद्मिनी ॥ ३ । २५
इत्यत्रालङ्कारः सहृदयहृदयरञ्जकः ।
हारेण किं सुमध्यायाः सुकेश्याः कुसुमेन किम् ।
किमञ्जनेनायताक्ष्या रण्डाया मण्डनेन किम् ॥ ३ । २७
किं धर्मो यत्र नो रण्डा धिक् सुखं रण्डया विना ।
रण्डा हीनोऽस्तु मा मोक्षः प्रौढैरित्युदितं विटैः ॥

सार्वकालिकाः सूक्तयः अत्र बह्वयः विराजन्ते ताश्च ।

१. सर्वः सर्वज्ञः परदोषानुदर्शनम्
२. पान्तु नो भगवत्पादा जघन्यजनवत्सलाः

In Public domain. Digitization Muthulakshmi Research Academy


३. विद्याविरहिताः वैद्याः कायस्थाः प्रभविष्णवः ।
दुराचाराश्च गुरवः प्रजानां क्षयहेतवः ।।
४. अहो भगवती कार्यसर्वार्थसिद्धिप्रदा मर्षा ।
५. सत्रभोजनपूर्णाङ्गः पुनरायतयौवनः २।३३
६. दुर्निवारश्च नारीणां पिशाचो रतिरागकृत् ।

व्यासदासापराभिधः अयं कविः एतादृशसरलशैलीपराणां कव्यानां रचनया साधारणजानान् अपि सरसान् सहृदयान् चकार इत्येतावता प्रतिपादयामि ।

इति शम्

उपयुक्तग्रन्थः

१. क्षेमेन्द्रलघुकाव्यसंग्रहः संस्कृतपरिषद् ,
उस्मानियाविश्वविद्यालयः ,
हैदराबाद् - ५०० ००७ ,
द्वितीय मुद्रणम् - २००९

In Public domain. Digitization Muthulakshmi Research Academy

# ५. समयमातृकानुशीलनम्

डी. रामकृष्णः

प्रथितयशसोऽभिनवगुप्तस्यान्तेवासी व्यासदासापरपर्यायो एकादशशताब्दीयः काश्मीरप्रभोरनन्तस्य सभापण्डितः क्षेमेन्द्रः स्वदेशवासिनः सत्पथमानेतुं प्रयस्यन्निव बहूनुपदेशप्रचुरान् ग्रन्थान्निर्बबन्ध । संस्कृतभाषायां सामान्यज्ञानवतां, बृहन्निबन्धावलोकनालसानामानुकूल्येन सुलभग्राह्यं निबन्धजातमनेन प्रणीतम् । सामान्योपयोगि ग्रन्थकारोऽयं '' प्रजाकवि '' इति जेगीयते । त्रयस्त्रिंशत्संख्याकेऽस्य ग्रन्थसन्दोहे दामोदरगुप्तस्य कुट्टनीमतानुसारिणीयं समयमातृका । यत्र वेश्याहृदयाविष्करणमन्यादृशं विहितम् । '' क्षेमेन्द्रेण सुभाषितं कृतमिदं सत्पक्षरक्षाक्षमम् '' इति ग्रन्थान्ते स्वयं कविः स्वग्रन्थस्वरूपं प्राकटयत् । कथमेतद् समर्थ्यतेत्याक्षेपे स्पृहणीयगुणैर्महात्मभिश्चरिते वर्त्मनि यच्छतां मनस्स्वयमप्यन्यतम इत्यत्र किञ्चिदुच्यते । तथा हि - द्रष्टव्येषु किमुत्तमं ? मृगदृशः प्रेमप्रसन्नं मुखं घ्रातव्येष्वपि किं? तदास्यपवनः, श्राव्येषु किं ? तद्वचः। किं स्वाद्येषु ? तदोष्ठपल्लवरसः, स्पृश्येषु किं ? तद्वपुर्ध्येयं किं ? नवयौवने सहृदयैः सर्वत्र तद्विभ्रमाः ।।

इति सुभाषितत्रिशत्यन्तर्गते शृङ्गारशतके महाकविर्भर्तृहरिः स्पष्टमुक्तवान् । अत एव स्वयं तत्रैव '' समस्तभावैः खलु बन्धनं स्त्रियः '' इत्यवितथमाह च ।

रतिक्रीडा अङ्गना च मनुष्यजीवनस्यापेक्ष्योपादानविशेषौ, तावधिकृत्य अमरुकप्रणीतं प्रबन्धविशेषमुद्दिश्य '' अमरुकस्य कवेर्मुक्तकाः शृङ्गारस्यन्दिनः प्रबन्धायमानाः प्रसिद्धा एव '' इति '' कवेरेकः श्लोकः प्रबन्धशतायते '' इति च ध्वनिकारः प्रशशंस ।

नरं वर्षीयांसं नयनविरसं नर्मसु जडं ।
तवापाङ्गालोके पतितमनुधावन्ति शतशः ।।

In Public domain. Digitization Muthulakshmi Research Academy


गलद्वेणीबन्धाः कुचकलशविस्रस्तसिचयो ।
हठात्तृट्यत्कांञ्च्यो विगलितदुकूला युवतयः ॥

इत्यादि प्रतिपादयतां शङ्करभगवत्पादानां सौन्दर्यलहर्याः लक्ष्मीधरीव्याख्याकारः लोल्ललक्ष्मीधरदेशिकवर्यः ।

गतोऽयं शङ्कराचार्यो वीरमाहेश्वरो गतः ।
षट्चक्रभेदने को वा जानीते मत्परिश्रमम् ॥ इति

स्वयं प्रकटितमहिमा नवनवतिश्लोकव्याख्यानावसरे " षट्कमलभेदमते सुखस्वरूपैव मुक्तिः । सुखं तु लौकिकदृष्टान्तेन स्त्रीसम्भोगात्मिकेव । लोकेऽपि स्त्रीसम्मेलनात् परं सुखं नास्ति " इत्युदघोषयत् ।

" देशाटनं पण्डितमित्रता च वाराङ्गना राजसभाप्रवेश " इत्यादिना पञ्चतन्त्रकारोऽपि बुद्धिवैशद्यसम्पादकं प्रत्यपादयत् ।

एवं वात्स्यायनादारभ्य सहृदयहृदयाह्लादकारिणः कवयः स्त्रीपुंसयोगोद्भवां परां निर्वृतिमधिकृत्य स्वनिबन्धेषु वचोविन्यासवैचित्र्यं प्रदर्शितवन्तः । तथा चिरन्तनप्रदर्शितेन पथाऽयमपि सत्पथगामी कविः ग्रन्थमिमं समयमातृकाख्यं जग्रन्थ । कवेरस्य भाषा मधुरा, सरसा, सुबोधा च ।

यथासम्प्रदायं ग्रन्थादौ उपासकः कुसुमधन्वकपश्चात् उपास्या देहिसमूहमोहनमयी काली नत्या सम्भाविता ॥ ततः अष्टसमयेषु चत्वारिंशदुत्तरषट्शतश्लोकपरिमितां वाररामाणां रहस्यार्थमन्त्रतन्त्रोपयेगिनीं समयमातृकां निरूप्य कवि प्रेक्षावत् प्रवृत्तिमासादितवान् । तदितिवृत्तमुपन्यस्यते । तत्र प्रथमसमयस्तावत् चिन्तापरिप्रश्नाख्यः । काश्मीरे प्रवराभिधं पुरमस्ति । तत्पौरस्त्रीत्रिवलीकूले गूढो त्रिनेत्रनेत्राग्नित्रस्तोऽसमसायकः । तद्दर्पभूः कलावती नाम वेश्या तत्पुरमधिवसति । एकदा हर्म्यशिखरारूढा सा गणिकागुरुं तथा कामिनां नर्मसुहृदं च (यथा " रब ने बना दी जोडी " इति चलचित्रे नायाकस्य शारुकस्य आयुष्कर्मकरः) नादितं ददर्श । ताम्बूलष्ठीवनभयादुपरि क्षिप्तचक्षुषं तं नेत्राञ्चलसंज्ञया आहूतवती । समीप्य चिन्तानिश्चलललोचनां तां सः ।

In Public domain. Digitization Muthulakshmi Research Academy

'' किं केनचित् सुचिरसेवननिष्फलेन मिथ्योपचारवचनेन न वञ्चितासि '' इति, '' गूढं वशीकरचूर्णमुचा कचेषु किं केनचित् न कुहकेन वशीकृतासि '' इत्येवं बहुधा पृष्टवान् ।

चिन्ताविशेषविवशा सा सुखदुःखसहायभूतं तमुद्दिश्य सखे ! कङ्क ! मम गृहनिधानव्यालीं मे मातामहीं रोगधराख्यो वैद्याधमः पञ्चतां प्रापितवान् । तस्यामतीतायां मम गृहे '' रिक्तः शक्तो न निर्याति नाप्नोत्यवसरं धनी '' इति बाष्पपर्याकुलेक्षणाऽभवत् । वैद्योऽसौ कुट्टनीकृतान्त इति न जानासि इति समाश्वस्य,

प्रविष्टा कुट्टनीहीनगृहं क्षीणपटा विटाः ।
गाथाः पठन्ति गायन्ति व्ययद्रविणमर्थिताः ॥ स.मा.४४
व्याघ्रीव कुट्टनी यत्र रक्तपाना मिषैषिणी ।
नास्ते, तत्र प्रगल्भन्ते जम्बुका इव कामुकाः ॥इति। स.मा.४१

कुट्टन्या अभावे जायमानां स्थितिं निरूप्य । कृत्रिमः क्रियतां गेहे रक्षायै जननीजनः ।

माता काचिदनेककूटकुटिला काचित् समन्विष्यताम् ॥

इत्युपदिश्य स्वस्य पूर्वपरिचितामेकां कुट्टनीमधिकृत्य –

'' तद्वृत्तश्रवणेन कोऽपि सञ्जायते बुद्धिविशेषलाभः ।'' इति वदन् तद्वृत्तश्रवणकौतूहलं तस्यामकल्पयत् । ततः चरितोपन्यासाख्यस्तावद्वितीयस्समयः प्रवृत्तः ।

तत्र कङ्कः :-

पूजासञ्ज्ञा भजन्ते जयनुतिषु नतिं दिक्षु काम्बोजभोजाः
सेवाशुष्कास्तुरुष्काः परिचरणरसे किं च चीनाः प्रलीनाः ।
उत्कण्ठार्तास्त्रिगर्ताः परिचरणविधौ पीडयन्त्येव गौडा
दम्भारम्भेण तस्या विदधति कुसुमोत्सङ्गतामङ्गवङ्गाः ॥२-१०४
सा सर्वदेशपरिशीलितवेषभाषा
प्रभ्रष्टभूपतिसुताहमिति ब्रुवाणा ।
छिन्नाङ्गुलिर्दशनखण्डितनासिकाग्रा
लालाटनीलतिलकैर्विदिता ममैव ॥ २ - १०४

In Public domain. Digitization Muthulakshmi Research Academy


कुट्टन्या सह स्वस्य परिचयं ज्ञाप्य –

सा चेत् प्रकीर्णधनगेहनिधानसर्पी
गृह्णाति लोभजननी जननीपदं ते ।
तत्कामिलोकसकलार्थसमृद्धिमेतां
यत्नाद् विना सुतनुहस्तगतामवेहि ॥ इति २ - १०७

कलावत्यां धैर्यमुत्पाद्य –

भ्रान्त्वा महीं जलनिधिप्रथितामशेषां
मायाविनीति विदिता विरतोन्नतिः सा
प्राप्ता पुनर्निजपदं तनुचीरशेषा, इति तस्याः साम्प्रतिकीं स्थितिं निरूप्य –

तस्मात्तामहमेव कूटकुटिलां गत्वा स्वयं त्वत्कृते
सर्वज्ञां सकलार्थसार्थसरणेः सिद्ध्यै समभ्यर्थये ।
इत्युक्त्वा '' आपद्गतं च न जहाति ददाति काले '' इति
भर्तृहरिप्रोक्तं सन्मित्रलक्षणं परिपालितवान् ।

एतत्कथनात् पूर्वं यदा सा कुट्टनी सप्तवर्षप्राया जनन्या पण्यतां नीता तदारभ्य तया विविधप्रदेशेषु स्वीयानितरसाध्यवेश्यास्वभावजचौर्यादि कलया कथं वा बहवो कामुका वञ्चिता इति यथातथमकथयत्। तत्पात्रमुखेन प्रजाकविरयं क्षेमेन्द्रः वारवनिताबुद्धिवैशद्यं बहुमुखीनं प्रत्यपादयदिति वस्तुस्थितिः । वृत्तान्तोऽयं अस्मद्देशीयं चिन्तामणिनाटकं स्मारयति खलु । ततः तृतीये समये प्रदोषवेश्यालापवर्णनात्मके –

गृहीतस्योपरि कथं गृह्यते ग्रहणं पुनः ।
पूर्वं किं नागतोऽसीति वदन्तीष्वपरासु च ॥
एकः स्थितोऽन्तः प्राप्तोऽन्यः परस्याद्यैव दुर्ग्रहः । ३ - १४
किं करोमीति जननीं पृच्छन्तीष्वपरासु च ॥ ३ - २४
निशा दीर्घा नवः कामी तनयेयं कनीयसी ।
व्यग्रेति कालहाराय वृद्धावर्गे कथोद्यते ॥ ३ - २५
प्रवाससक्तेरधिकारिसूनोः स्थितावरुद्धा तनया ममेति ।
काचिद् वदन्ती विजने विगूह्य जग्राह भाटीं त्रिगुणां समृद्धात् ॥
३ - ३०

In Public domain. Digitization Muthulakshmi Research Academy

अल्पं ममैतद् दुहितुर्न योग्यं न च क्षणोऽस्ति त्वमदृष्टपूर्वः ।
इति ब्रुवाणापि विटं पटान्ते गाढ़ं गृहीत्वा न मुमोच काचित् ॥

इत्येवमादिप्रदोषकालीयवेश्यालापास्सुवर्णिताः ॥ अथ नापितः कुट्टनीं आनीतवान् । तां विलोक्य कलावती चरणवन्दनासनसमर्पणादिना सम्भाव्य –

उद्भिन्नयौवनमनोहररूपशोभा सम्भाविताभिनवभोगमनोभवानाम् ।
एणीदृशां त्वदुपदेशविवर्जितानां मातर्भवन्ति न हि नाम समीहितार्थाः ॥

तस्माद् भजस्व परिकल्पितपुत्रिकां मां ।
भक्तामनन्यशरणां शरणं प्रपन्नाम् ॥

इत्यात्मानं निवेदितवती । ततः सा -

कङ्केन जन्मसुहृदा त्वदर्थमहमर्थिता ।
स्यूतेयं विटच्छिन्ना नासा येन पुनः पुनः ॥

अतः पात्रं मदुपदेशस्य त्वमेवेत्यकथयत् । पश्चात् श्रूयतां प्रथमं पुत्रि भूत्यै इत्यारभ्य जगत्त्रये देवमनुष्यनागाः प्रज्ञादरिद्राः खलु सर्व एव, बुद्धिहीनप्रसादेन जीवामः केवलं वयम्, असत्येनैव जीवन्ति वेश्याः, असत्येनैव वेश्यानां भवन्ति धनसम्पदः, सुकृतनिधये श्रद्धाधाम्ने धनाय नमो नमः, न तु यौवनमात्रेण लभन्ते ललनाः श्रियम् , तवेयं यौवनतरोच्छाया विस्मयकारिणी, यथाप्युपायशून्येन रूपेणानेन सुन्दरि, न प्राप्यन्ते प्रकृष्टेन प्रयत्नेनेव सम्पदः इत्याद्युपदिष्टः । श्रवणपेयं तस्याः वचनामृतमवाप्य कलावती-जननि मे द्रविणाधिगमोचितं परिचयं कथयेति जगादेति पूजाधरोपन्यासाख्यश्चतुर्थः समयः विस्तारितः ।

अथ पञ्चमे रागविभागोपन्यासाभिधे

पूर्वं भावपरीक्षैव कार्या यत्ने न कामिनाम् ।
ज्ञातरागविभागानां कर्त्तव्यौ त्यागसंग्रहौ ॥

इत्यारभ्य कुट्टनी कलावतीमुद्दिश्य मन्मथमत्तानां कामिनां बन्धाय बन्धकीशिक्षामाचचक्षे । तत्र अष्टौ धात्वनुकारिणो कुसुम्भादयो रागाः, सान्ध्यरागादि अष्ट वृषरागादयः, केशरागाद्यष्ट अङ्गविभाविनः, छायारागाद्यष्टौ महारागाः, कौसुमादिषोडशप्रकीर्णकाः

In Public domain. Digitization Muthulakshmi Research Academy



इत्यशीतिः समासेन रागभेदाः प्रकीर्तिताः ।
विस्तरेण पुनस्तेषां कः संख्यां कर्तुमर्हति ॥ इति

सलक्षणं रागभेदा उपदिष्टाः । ततः सुहृज्ज्ञनार्जनं कुर्यात् पूर्वं वारविलासिनी ।

सुहृद्भिरेव जानाति कामुकानां धनं गुणम् ।
हृदयग्रहणोपायं शीलं रक्तापरक्तताम् ॥ इति

सुहृत्सम्पादनावश्यकतां प्रतिपाद्य, कामुकेषु के वा वेश्यानां जङ्गमाः कल्पपादपा इति निपुणतरं निरूप्य

श्लो. प्राप्ते काले कथमपि धनादानपात्रे च वित्ते
त्वं मे सर्वं त्वमसि हृदयं जीवितं च त्वमेव ।
इत्युक्त्वा तं क्षपितविभवं कञ्चुकाभं भुजङ्गी
त्यक्त्वा गच्छेत् सधनपरं वैशिकोऽयं समासः ॥

उद्देशलेशेन यदेतदुक्तं तत्कार्यकाले विविधप्रयोगम् ।

तस्मात्स्वबुद्ध्यैव विचार्य कार्यम् । इति कर्तव्योपदेशं सम्यक् कृतवती । तदेतद्विचार्य क्षेमेन्द्रस्य कामतन्त्राधीतिबोधौ विस्मयं जनयतः । अहो चिरन्तनभारतीयविदुषां प्रज्ञावैभवम् । अहो तत्प्रतिपादन कौशलम् । एकमप्यक्षरमनपहायाध्येयोऽयं ग्रन्थ इत्यत्र नास्त्यत्युक्तिः ।

अथ रात्रावतीतायां उदिते रवौ समातृका नादितदत्तहस्ता कान्तां तनुं पण्यदशां नयन्ती अर्थार्थिनी कलावती राजपथप्रकारं हर्म्यमारुरोह । प्रातर्नवं कामुकमीक्षमाणः कङ्कः शयनोत्थितानां पण्यांगनानां तथा गणिकागृहेभ्यः निर्गच्छतां कामुकानां च विचेष्टाः निरूपितवान् । ततः कलावतीमीक्षमाणानां कमलप्रपञ्चश्रीगुप्तानां चेष्टाः उपन्यस्य पश्चात् पङ्काख्यो वणिक्सूनुः दर्शितः। तदा कङ्कालिका सस्मितं अखिलधनावाप्तये बन्धकीनामक्लेशाराधनार्होऽयं स्वयमुपनयतीति कलावतीमुक्त्वा –

' पार्श्वे त्वमेषां व्रज कङ्क तूर्णं दूतं करिष्यन्ति भवन्तमेते '

इत्यादिष्टवती । हृष्टः सोऽपि सौधादवरुह्य जगामेति विषयः षष्ठ समयगतोऽस्ति ।

ततः कामुकसमागमो नाम सप्तमे समये आदौ वसन्तागमः

In Public domain. Digitization: Muthulakshmi Research Academy

सूचितः । प्रायः कार्यार्थिनीनां स्त्रीणां वयसि नियतिर्नास्ति खलु । अतः वणिकशिशोः कृते नापितदूताभ्यर्थनया कलावती सन्ध्यायां मण्डनासक्ताऽभवत् । अलंकृता तदा –

हारिणी सा तनुलता हारिणी च कुचस्थली ।
दृष्टिश्च हारिणी तस्या बभौ स्मरविहारिणी ॥

अत्रान्तरे बहिः विटैः वेश्यासमागमे शैलीं शिक्षितः वणिक्सूनुः गणिकागृहं प्रविश्य कामिनीपार्श्वे प्रौढवत् समुपाविशत् । ततः कङ्काली विटानां पुरः -

शिशुरप्ययमस्माकं कामुकोऽभिमतः परम् ।
बाल एव सहस्रांशुः कमलिन्या विकासकृत् ॥

इत्यस्तुवत् । ततः कलावत्याः धात्री वेतालिका ' अत्यल्पः परिवारोऽयं ताम्बूलप्रणयी स्थितः ' इत्युक्त्या कङ्कादिभ्यः ताम्बूलदानाय सूचितवती । तदा मधुपानविघूर्णमाना वैतालिकाः युधि अहं नृपस्य दक्षिणो बाहुः, मयि स्थिते तिष्ठति नाट्यशास्त्रं, त्रैलोक्यवृत्तं गणितेन वेद्मि इत्याद्यूचिरे । अनन्तरं ताम्बूलार्पणलीलया कलावत्या विसृष्टास्ते निर्ययुः । ततः सा हरिणाक्षी क्षीबमेनं बालमादाय शयनमभजतेति कविरवर्णयत् ।

अथान्तिमे कामुकप्राप्त्याख्याष्टमे समये वेश्यालताः सरागं पूर्वं तदनु प्रलीनतनुरागम् । पश्चादपगतरागं पल्लवमिव दर्शयन्ति निजचरितम् ॥ इति वेश्याचरितसमग्रावलोकनपाटवेन कविना समयमातृकायाः कङ्काल्या बुद्धिसंविभागेन कथं वणिजः सकलं भुक्त्वा कलावती पूर्णविभवाभूदिति सूपपादितम् । तथाहि - प्रभाते रात्रिसुखप्रश्नपरां कङ्कालीमुद्दिश्य कलावती - मूर्तः प्रजागरः सः चटकरतिः मां गणनातीतैः समारोहैः खेदक्लान्तामकरोद् इत्यादिना रात्रौ वणिक्सुतस्य प्रवृत्तिं विशदीकृतवती । तदा सा कङ्काली पितृभवनहृतं नियतं हस्तगतं विद्यते धनं तस्य । भवति तद्विधमधिकं प्रागल्भ्यं रिक्तहस्तस्य ॥ इत्युक्त्वा तमुपसृत्य तस्मात् जनकभाण्डशालात्तं सारतरं गृहीत्वा उपायेन तमन्तः प्रावेशयत् । तथा तं प्रच्छाद्य भवद्भिः वणिक्सुतव्याजाद्दस्यु सुतः

In Public domain. Digitization Muthulakshmi Research Academy



प्रवेशितोऽस्मद्गृहे, तेन प्रभाते आभरणमादाय गतमिति वीराः प्रतारिताः। तद्वचनाकुलिता वीराः ततो प्रययुः। ततः उपायेन कामुकस्यास्य वणिक्सुतस्य पिता लुब्धः अपि कङ्काल्या वञ्चितः। ततः कलावती तं कङ्कं विवाहे प्रत्ययहेतोः धनधारणपत्रिकां कुरु इत्यभ्यर्थितवती। सोऽपि विक्रमशक्तेर्नृपमहिषी भ्रातृपुत्रस्य नाम्ना स्थूलतरोज्ज्ञासपत्रिकामलिखत्। पश्चात् कङ्काली तामुपेत्य –

\- मासादधिकायातं दिनद्वयं पुष्पदर्शनस्नाने।
अद्यैव कलावत्या गर्भशङ्काकुलं चेतः॥
तस्मात् जनकभावादविकलमापत्स्यमाननिजविभवम्।
अधिकरणपत्रलिखितं प्रयच्छ सुमते कलावत्यै॥

इत्यर्थितवती। सोत्साहः सोऽपि तथैवाकरोत्।

अथ शिथिलादरया कङ्काल्या कृतसङ्केतः कङ्कः कलावतीमुद्दिश्य रणविलासादयस्तु त्वामर्थयन्ते।

विरजयि वयसि नवेऽस्मिन्नेकश्चेदीप्सितस्तव स्वामी।
तत्किं यौवनभङ्गे ददाति कश्चिद् धनं मुग्धे। इत्याद्युक्तवान्।

तद्वचनशरैर्दारितो वणिक्तनयः कलावत्या बहुधा शय्याव्यवहारेण तिरस्कृतः कङ्काल्या प्रतारितः कुमार्गेण निष्क्रान्तः।

एवं च

समयेन मातृका सा कृत्रिमरूपा कृता कलावत्या।
तन्नाम्नैव निबन्धः क्षेमेन्द्रेण प्रबद्धोऽयम्॥

तथा चेयं समयमातृका रमणीयार्थप्रतिपादकशब्दैः, छन्दोऽलङ्काररीतिगुणरसादिकाव्यशोभाकरैर्धर्मैः कविसमयैः, कवेरसमानप्रतिभया चित्रितपात्रगतैर्गुणैः संस्कृतवाङ्मये वैलक्षण्यं, सहृदयरसिकोपादेयतां च भजत इति, लोकसत्तां, संस्कृतव्यवहारशक्तिं च सूत इति सप्रश्रयं निवेद्य विरम्यते।

इति शम्

उपयुक्तग्रन्थः

१. क्षेमेन्द्रलघुकाव्यसंग्रहः संस्कृतपरिषद्, उस्मानियाविश्वविद्यालयः, हैदराबाद - ५०० ००७, द्वितीय मुद्रणम् - २००९

In Public domain. Digitization Muthulakshmi Research Academy

# ६. भारतमञ्जरी - राजधर्माः

- डा.वि.श्रीनिवासशर्मा

भारतीयसंस्कृतेः आधारभूताः अपौरुषेयाः राशीभूताः वेदाः एव । तान् विभज्य महार्षिः व्यासः महान् लोकोपकारकः अभूत् । अनन्तरं पञ्चमवेदात्मकत्वेन महाभारतं व्यलिखत् । ग्रन्थोऽयं भारतदेशस्य विज्ञानसर्वस्वमिति सर्वैरपि अङ्गीक्रियते एव । प्रायः ग्रन्थेऽस्मिन् ये विषयाः भवन्ति, प्रपञ्चेऽन्यसाहित्ये कुत्रापि नोपलभ्यन्ते इति सर्वैरपि विदितमेव तदर्थमेव स्वयमेव भारते –

धर्मे च अर्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ॥

रामायणरचनाकारः आदिकविः वाल्मीकिरिव महाभारतप्रणेता, अष्टादशपुराणकर्ता च श्री वेदव्यासोऽपि संस्कृतकव्युपजीव्यत्वेन मतः । कवयः एतदीयान् उपाख्यानान्यादाय काव्यनाटक-चम्पू कथाऽऽख्या-यिकादिमयं विपुलं साहित्यं अधुनापि सृजन्त्येव ।

यावत् महाभारतस्य अध्ययनं न भवति तावत् न प्राक्तन-राजनीतिविषयकं ज्ञानं जायते, न च अर्थशास्त्रस्यापि मर्मविदितं भवति । धर्मस्य निरूपकत्वात् प्रदर्शकत्वादुपदेशकत्वाच्च महाभारतं निःसंशयं भारतीयानां जनानां धर्मशास्त्रं पञ्चमं वेदो विद्यते ।

प्रतिभासम्पन्नः क्षेमेन्द्रः विश्वविख्यातान् सामाजिकराजनैतिक-प्रजोपयोगान् नैकान् ग्रन्थान् अरचयत् तेष्वयं भारतमञ्जरीग्रन्थः अन्यतमः । न केवलं स्वसाहित्ये भारतस्य स्थितिमवर्णयत् कविः अपि तु - तदानीन्तनानां प्रजानां राज्ञां स्थितिः कीदृशी, प्रजाजीवनं कथं आसीत् , समाजे जनाः कीदृशाः तेषां जीवनं कथमासीत् , तेषां आचारव्यवहाराः कीदृशाः आसन् , इत्यादीनां विषयाणां चर्चामपि कृतवान् स्वीयग्रन्थेषु । तादृशेषु ग्रन्थेषु भारतमञ्जरीमधिकृत्य प्रस्तौमि ।

In Public domain. Digitization Muthulakshmi Research Academy



ग्रन्थेऽस्मिन् १८ पर्वाणि सन्ति । पर्वनामान्यपि भारते यथा सन्ति तथैव सन्ति । महाभारते यान् विषयान् अवोचत् व्यासमहर्षिः प्रायः तान् विषयानेव स्वीकृत्य, मूलविषयानविहाय व्यासदासः क्षेमेन्द्रोऽपि सम्यक् प्रतिपादितवान् । भारतमञ्जर्यां राजधर्माः इत्यमुं अंशमधिकृत्य प्रस्तौमि ।

भारतमञ्जरीग्रन्थः राज्ञां कथासमन्वित इति कारणादत्र भारतमञ्जर्यां राज्ञां धर्माणां राजनीतेश्च विशदं वर्णनं लभ्यते, राज्ञा राजधर्मपालनेनैव प्रजास्सर्वाः धर्मपालननिर्भराः भवन्ति । क्षत्रियाणां सामान्यधर्मपालनमपि राजधर्मानधिकृत्यैव प्रवर्तते । अतः राजधर्माः धर्माणां सर्वेषां श्रेष्ठाः । राजधर्मस्य भावाभावौ वर्णयन्नर्जुनः -

* मिथो मत्स्या इवाश्नन्ति जना दण्डविवर्जिताः ।
यत्र संनिहितो दण्डः श्यामो लोहितलोचनः ॥
तत्र वेदैश्च यज्ञैश्च वर्धन्ते धर्मसम्पदः । भा.म.शान्ति.८७,८८

अर्थात् राजधर्माभावे यथा महामत्स्याः अन्यान्, मत्स्यान्, खादन्ति तथैव बलवन्तः दुर्बलान्, पीडयन्ति । यत्र च तस्य भावः तत्र धर्मसम्पदः वर्धते ।

सम्यक् पालनेन राजा स्वर्गगामी भविष्यति, तथा राजदण्डभयात् प्रजाः धर्मपराः भवन्ति ।

* लोकस्य पालनात्सम्यग्राजानः स्वर्गगामिनः ।
स्वधर्मेषु प्रवर्तन्ते राजदण्डभयात् प्रजाः ॥ भा.म.शान्ति.८६

* किञ्च राजा प्रजानां पिता - पिता प्रजानां नृपतिः
\- भा.म.शान्ति.२९८

* राज्ञः अभावे राष्ट्रं क्लेशमनुभवति - जगत्सीदत्यराजकम्
\- भा.म.शान्ति.२९८

पुनश्च धर्ममर्यादा विनष्टा भवति -

* सीदते धर्ममर्यादा राष्ट्रे हि नृपवर्जिते । भा.म.आदि .४७४

तथैव -

In Public domain. Digitization Muthulakshmi Research Academy


* दुर्बलं घ्नन्ति बलिनः सेवन्ते च परस्त्रियाः ।
मांसं मिथश्च खादन्ते राष्ट्रे राजविवर्जिते ।।भा.म.शान्ति.२९९
* नाराजकेषु राष्ट्रेषु हव्यं वहति पावकः ।
न च धर्माः प्रवर्तन्ते न च वर्षति वासवः ।।
कुतो धनं कुतो दाराः शरीरं च कुतो नृणाम् ।
सर्वदेवभयस्त्राता यावन्न वसुधाधिपः ।। भा.म.शान्ति.३०२-३०३

अतः धर्माणां सर्वेषां श्रेष्ठः राजधर्मः, तत्पालनेनैव समृद्धिः सम्पदश्च भवन्ति ।

भारतमञ्ज्यां राजधर्माः बहवः प्रोक्ताः । कतिपयधर्माः स्थालीपुलाकन्यायेनाधो प्रदर्श्यन्ते ।

**१. राज्ञः आचरणे धर्मप्रधानता** -

* राजा चरति चेद् धर्मं देवत्वायैव कल्पते ।
स चैदधर्मं चरति नरकायैव गच्छति ।। म.भा.उद्योग १३२.१३

इत्यादिना राज्ञः आचरणे धर्मप्रधानतोक्ता । अर्थात् यदि राजा धर्मात्मा तदा प्रजाभिस्सः ईश्वरतुल्य इव पूज्यते, अधार्मिकश्चेत् तै तिरस्कृतश्च भवतीति ।

धर्मात्मा राजैव श्रेष्ठः इति भीष्मेण एकस्मिन् सन्दर्भे निगदितः
दैवतं पितरं यस्य धर्मो यस्य प्रजाहितम् ।
सम्यग्दण्डो व्रतं यस्य स राजा यज्वनां वरः ।। भा.म.शान्ति.४०१

किञ्च धार्मिकस्य राज्ञः लक्षणानि युधिष्ठिरेण पृष्टे सत्युच्यते भीष्मेण -

* याजिनः शुध्दसंकल्पाः त्यागिनः पात्रवर्षिणः ।
त्रातारः सर्वधर्माणां कर्तारः पुण्यकर्मणाम् ।।
श्रोतारः साधुवचसां भेत्तारो धनहारिणाम् ।
तरन्ति घोरदुर्गाणि परत्रेह च भूमिपाः ।। भा.म.आदि.४०४,४०५
सदाचारः तपोयुक्तः प्रशान्ताः सत्यवादिनः ।
सन्तरन्ति च दुर्गाणि नारायणपरायणः ।। भा.म.आदि.४०६

भावार्थ स्पष्टः एव ।

In Public domain. Digitization Muthulakshmi Research Academy


राज्यसंवर्धनाय युध्दादयः कर्तव्याः भवन्ति, तत्रापि धर्मपरित्यागः न कर्तव्यः, तत्रापि धर्मपरेणैव भवितव्यम् । भीष्मेणोच्यते

* विषमस्थैः असंनध्दैः क्षीणसैन्यैः भयार्दितैः ।
न युध्यते श्त्रियो यः स धर्मविजयी नृपः ॥ भा.म.शान्ति.३६७

स एव राजा विजयी भवति यः विषमस्थैः असंनध्दैः क्षीणसैन्यैश्च राजभिः न युध्यते । अर्थात् एतादृशैः सह युध्दः न करणीयः । एवं युध्देऽपि धर्मपरित्यागो न कर्तव्यः ।

एवं राजधर्माः बहवः क्षेमेन्द्रेण चर्चिताः ।

## २. राज्ञां गुणाः -

प्रसङ्गवशात् राज्ञां गुणाश्चपि प्रोक्ताः -

* शौर्यं तेजो धृतिर्दाक्ष्यं युध्दे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥ म.भा.भीष्म ४२-४३

तथा च -

* गोप्ता तस्माद्दुराधर्षः स्मितपूर्वाभिभाषिता ।भा.म.शा.३३८-३९

* राजा प्रजानां हृदयं गरीयो गतिः प्रतिष्ठामुत्तमञ्च ।
भा.म.शान्ति.६८.५९-६०

* शीलमाभरणं राज्ञां सौजन्यं विदुषामिव ।
शीलेन राजते लक्ष्मीः वसन्तेनैव मञ्जरी ॥ भा.म.शान्ति.४६५

* सुनयो राजवृत्तीनां विनयो गुणसम्पदाम् ।
लावण्यमिव नारीणां विभूषणमकृत्रिमम् ॥ भा.म.शान्ति २६५

इत्यादिभिः श्लोकैः राजा शूरः, तेजस्वी, धीरः, दक्षः, गोप्ता, दुराधर्षः, स्मितपूर्वभाषी, प्रजारञ्जकः, सुजनः, विनीतश्च भवेदिति क्षेमेन्द्रः निश्चिनोति, तादृशानामेव राज्ञां चरितं अत्रास्यां भारतमञ्जर्यां तेन निबद्धम् ।

किञ्च राज्ञां प्रधानगुणानेकत्रैव सङ्कलनं कुर्वन् क्षेमेन्द्रः भारतमञ्जर्यां शान्ति पर्वणि ३१० त - ३१९ श्लोकपर्यन्तं राज्ञःगुणान् षड्त्रिंशत् ब्रूते ।

एवं गुणी राजा एव प्रजारञ्जको भवतीति विश्वासेन राज्ञा गुणवता भाव्यमिति क्षेमेन्द्रेण सूचितम् ।

In Public domain. Digitization Muthulakshmi Research Academy


## ३. प्रजापालने राज्ञा कीदृशेन भाव्यम् -

क्षेमेन्द्रो वदति - अनुकम्पावशात् प्रजाभिस्सह पितराविव व्यवहारः करणीयः । अनिष्टदुरीकरणात् सोऽग्निः दुष्टनाशकत्वात् सः यमः । साधूनां यथाभिलषितदानात् कुबेरः, धर्मोपदेशदानात् गुरुः, आपन्निवारकत्वाद्रक्षकः भवतीति प्रस्तौति -

* माता पिता गुरुर्गोप्ता वह्निर्वैश्रवणो यमः ।
सप्त राज्ञो गुणानेतान् मनुराह प्रजापतिः ॥

म.भा.शान्ति.१३९.१०३

* सर्वावलोकने सूर्यः पापानां निग्रहे यमः ।
कुबेरो भरणे राजा प्रायश्चित्तेषु पावकः ॥ भा.म.शान्ति. ३०४

किञ्च * लोकरञ्जनमेवात्र राज्ञां धर्मः सनातनः ।
सत्यस्य रक्षणं चैव व्यवहारस्य चार्जवम् ॥म.भा.शान्ति.५७.११

इत्यादिना प्रजारञ्जकपालनमेव राज्ञां प्रथमं कर्तव्यमित्युद्घोषितम् ।

## ४. दण्डनीतिः -

दण्डनीतेः उचितप्रयोगात् प्रजाः रक्षिताः भवन्ति । दण्डनीतेः उद्देश्यं न केवलं आधिपत्यविस्तरः, अपि तु रक्षणञ्च । अत एव दण्डनीतिः पालनविद्याप्युच्यते । दण्डनीतेः चतुर्षु प्रमुखासु विद्यासु अन्यतमत्वेन कथनेनैव तस्याः प्राधान्यता ज्ञायते -

* त्रयी चान्वीक्षकी चैव वार्ता च भरतर्षभ ।
दण्डनीतिश्च विपुला विद्यास्तत्र निदर्शिताः ॥ मा.भा.५९.३३

सेयं दण्डनीतिस्त्वेवं परिभाषिता -

* दण्डेन नीयते चेदं दण्डं नयति वा पुनः ।
दण्डनीतिरिति ख्याता त्रीन् लोकानभिवर्तते ॥ म.भा.५९-७८

यत्र दण्डनीतेरुपस्थितिस्तत्रैव धर्मः स्वैरङ्गैस्सवैः सहितो भवति । समाजे विद्या, ऐश्वर्य, शौर्य, वीर्य इत्यादयस्सर्वे दण्डनीतेः उचितप्रयोगमाधारीकृत्य प्रवर्तन्ते । अस्याः दण्डनीतेः अभावे मात्स्यन्यायस्य प्रभावोऽधिकः भवति ।

भा.म.शान्ति. ८७.२९२-२९३

In Public domain. Digitization Muthulakshmi Research Academy


मात्स्यन्यायस्तु महामत्स्यैः सामन्यमत्स्यानां हानिः इव सामान्यजनानां हानिर्भवतीति सूचनम् ।

राजा न्यायपक्षपाती अन्यायविरोधी च भवेत्। पुत्रमपि अपराधिनं दण्डयेत् -

* पुत्रस्यापि न मृष्येच्च स राज्ञो धर्म उच्यते । म.भा.शा.९१.३२

किञ्च विचार्यैव दण्डनीतेः प्रयोगो कार्यः -

* नाविचार्य सृजेद् दण्डं यः स सर्वप्रियो नृपः । भा.म.शा.३६४

तेजस्वी सन्नपि अतीक्ष्णः क्षमाशीलः सन्नपि अरिमर्दनः यथापराधं दण्डयिता शक्तिशाली राजैव राजलक्ष्म्याः अधिकारीति प्रस्तौति -

* तस्मादतीक्ष्णस्तेजस्वी क्षमावानरिमर्दनः ।
यथापराधदण्डश्च प्रभविष्णुः पदं श्रियः ॥ भा.म.अरण्य. २१४.

इत्थं राजधर्माः क्षेमेन्द्रेण भारतमञ्जर्या सम्यक् व्यवस्थापिताः ।

इति शम् ॥

उपयुक्तग्रन्थः :

१. क्षेमेन्द्रलघुकाव्यसंग्रहः संस्कृतपरिषद् ,
उस्मानियाविश्वविद्यालयः ,
हैदराबाद् - ५०० ००७ ,
द्वितीय मुद्रणम् - २००९

In Public domain. Digitization Muthulakshmi Research Academy

# ७. चारुचर्या

डा.ए. प्रभावती देवी

क्रीस्तोरेकादशशतकस्योत्तरार्धः क्षेमेन्द्रस्य समयः । तत्समये राजा अनन्तदेवस्ततस्तस्य सुतः कलशश्च काश्मीरानपालयताम् । सुप्रसिद्धालङ्कारिको मम्मटाचार्यः मालवाधीश्वरो भोजराजः, आन्ध्रादिकविर्नन्नयभट्टश्चास्य समकालीना इति ज्ञायते। सुप्रसिद्धपण्डितः अभिनवगुप्तोऽस्य साहित्यगुरुः । अस्य दीक्षागुरुः सोमपादः । सोमपादस्य कविताप्रभावः क्षेमेन्द्रस्य रचनायां दृश्यते इति बृहत्कथामञ्जर्या ज्ञायते इति विमर्शकानामभिप्रायः ।

क्षेमेन्द्रस्य पिता प्रकाशेन्द्रः, सुतः सोमेन्द्रः । अस्य पूर्वजाः राजामात्या आसन् किल। यद्यप्यस्य शिवभक्तिप्रचुरं काश्मीरं जन्मस्थानं, तथाप्ययं हरिभक्तः ।

राजा अनन्तदेवः राज्ये प्रवर्तमानैरन्तःकलहैरर्दितस्स्वपुत्राय कलशाय राज्यं दत्त्वा आत्मघातमकरोत्किल । पत्नी महाराणी विदुषी सूर्यवती पत्या सहगमनमकरोत् । ईदृशस्थितौ क्षेमेन्द्रः स्वलेखिन्या राज्यं संवर्धयितुं प्रायतत । रामायणमञ्जरी भारतमञ्जरीति द्वे कृती रामायण भारतकाव्ये संक्षिप्य हृद्यं मनोहरंचारचयत् । लोकविख्यातस्य गुणाढ्यस्य बृहत्कथां स्वीकृत्य बृहत्कथामञ्जरीति नाम्ना व्यरचयत् । अत्र बोधिसत्त्वावदानकल्पलता क्षेमेन्द्रस्यान्या बृहत्कृतिः अस्यां बुद्धदेवस्य पूर्वजन्म सम्बन्धिन्यः कथाः तस्य प्रज्ञापारमितां सूचयन्त्यो वर्णिताः । अस्यां विद्यमानानां कथानां पल्लवानीति नाम चकार । क्षेमेन्द्रः न केवलं पण्डितजनरञ्जकानि काव्यानि निरमात् सर्वेषां जनानामानन्दमादातुं तेषां प्रवर्तनायां परिवर्तनमादातुं च व्यलिखत् । अनेनोद्देशेनैव, कलाविलासः, दर्पदलनं, चतुर्वर्गसङ्ग्रहः, चारुचर्या, नीतिकल्पतरुः, समयमातृका, देशोपदेशः सेव्यसेवकोपदेशः, नामानेकान् ग्रन्थान् व्यलिखत् । अस्य कृतयस्सर्वा अपि सरसा लोकव्यवहारोपदेशकाश्च । दशावतारचरितमस्यान्याकृतिः ।

In Public domain. Digitization Muthulakshmi Research Academy

अस्यां क्षेमेन्द्रस्य रचनाशैली प्रवाहसदृशा रमणीयपदगुम्पिता भासते । भाषा च मधुरा सरला सुबोधा ।

हास्योपदेशकाव्यानामयमेवाद्यः । स्वसमये विद्यमानानां राजोद्योगिनां कपटाचारान् स्वयमपश्यत् । प्रजानां रोदनं स्वकर्णाभ्या मश्रृणोत् । परदुःखदुःखितोऽयं कविः प्रजानामुपकर्तुं, स्वलेखिनीमेव साधनमकरोत् सेव्यसेवकोपदेशे पालकानां पालितानामाचारमवर्णयत् । चतुर्वर्गसङ्ग्रहे पुरुषार्थचतुष्टयं व्यशदयत् । नीतिकल्पतरुस्तु नाम्नैव ज्ञायते । देशविदेशे विविधप्रदेशेषु विद्यमानान् दुराचारान् अदर्शयत् ।

क्षेमेन्द्रस्य व्यासदास इत्यपरं नाम विद्यते इति तेनैवोक्तम् । तस्य व्यासे यावती भक्तिरिति चारुचर्यायाः अन्तिमश्लोकात् ज्ञायते । अतएव चारुचर्यायां व्यासभारतादेवोद्धृतान्यनेकान्युदाहरणानि । इत्थं प्रसिद्धकथादृष्टान्तेभ्यः क्षेमेन्द्रः सदाचारं हृद्यमुपदिशति । चारुचर्यायां विद्यमानास्सूक्तयो हृदयस्पर्शिन्यः प्रसन्नाश्च । नर्ममालां तु केवलं राजोद्योगिनां दुराचारानुद्दिश्य व्यलिखत् । उत्कोचकपटलेखाकरणादीन् ( Bribe & Forgery ) सम्यगाक्षेपगर्भं (satire) व्यलिखत् । साहित्येन लोकं नवीकर्तु - मुद्यम्य, क्षेमेन्द्रः प्रथमं साहित्यमेव नवीकर्तुं प्रारभत । काव्यस्य जीवात्मा रसो वा अलङ्कारवा गुणो वा वक्रोक्तिर्वेति मीमांसायामुत्पन्नायां औचित्यमेव जीवात्मेति प्रतिपाद्य औचित्यविचारचर्चां व्यलिखत् । सुवृत्ततिलके च्छन्दो विषयान्, कविकण्ठाभरणे काव्यबाह्यकारणानि प्रत्यनेकान् मौलिकविषयान् प्रत्यपादयत् । इत्थं साधनसामग्रिसम्बन्धिन्यः दीक्षादक्षतादयः न सर्वैरुपलभ्याः तादृशेषु विरलेषु विशेषतः साहित्यरङ्गे अग्रेसरः क्षेमेन्द्रः । क्षेमेन्द्रस्य सर्वासु कृतिषु चारुचर्या विशिष्यते । अत्र सर्वे श्लोकाः अनुष्टुप् च्छन्दस्येव विद्यन्ते । अधुना चारुचर्या काव्यतः विशेषोदाहरणानि कानिचन पश्यामः ।

श्लो. ३८. वक्रैः क्रूरतरैर्लुब्धैर्नकुर्यात्प्रीतिसङ्गतिम् ।
वसिष्ठस्याहरद्धेनुं विश्वामित्रो नियन्त्रितः ॥

गाधिसूनुर्विश्वामित्रः मृगयार्थं विपिनमगच्छत् । परिशान्तो वसिष्ठाश्रमं प्रविवेश । तं राजेति ज्ञात्वा वसिष्ठः सपरिवाराय तस्मै उत्तमान्नतर्पणम-

In Public domain. Digitization Muthulakshmi Research Academy

करोत् । विस्मयचकितो विश्वामित्रः कथमेतत्सर्वं कर्तुं प्रभवसीति वसिष्ठमपृच्छत् । वसिष्ठः कामधेनुं दर्शयन् अस्याः प्रभावेणेत्यवदत् । तदा राजा '' कामधेनुं '' गृहीत्वा प्रतिफलेन गोसहस्रं दास्यामीत्यवदत् । वसिष्ठः नैतदङ्गीचकार विश्वामित्रः बलात्कारेण गां नयति स्म । तदा गोश्शरीरादनेके वीरा राज्ञस्सैन्यं नाशमकुर्वन् । इयं कथा महाभारतस्यादिपर्वणि, पञ्चसप्तत्यधिकशततमेऽध्याये (१७५) वर्तते ।

श्लो. ५३. न तीव्रतपसां कुर्याद्धैर्यविप्लवचापलम् ।
नेत्राग्निशलभीभावं भवो नैषीन्मनोभवम् ॥

महादेवः हिमनगे तपस्तपतिस्म । सः अतीव जितेन्द्रिय आसीत् । अत एव पार्वत्यास्सेवामङ्गीचकार । पार्वतीपरमेश्वरयोः कुमारेणैव तारकासुरो म्रियते नत्वन्यैः इति सुराणां अभिप्रायः । अतः देवेन्द्रस्य प्रार्थनया मन्मथः महादेवे पुष्पबाणं प्रयोक्तुं प्रायतत । एतद्ज्ञात्वा महादेवः स्वतृतीयलोचनेन अनङ्गमन्वर्थमकरोत् । अतः तपश्शालिनां जितेन्द्रियत्वं न परीक्षणीयम् ।

श्लो. ५२. वर्जयेदिन्द्रियजयी विजने जननीमपि ।
पुत्रीकृतोऽपि प्रद्युम्नः कामितश्शम्बरस्त्रिया ॥

इन्द्रियाणि तपोभिः व्रतैः जेतुं शक्यन्ते । तथापि काले सम्प्राप्ते तानि मनुष्यानधः पातयन्ति । एकान्ते पुरुषः मात्रापि न तिष्ठेत् । यतः शम्बर स्त्री प्रद्युम्नं पुत्रमिवापालयत् । अनन्तरं सम्प्राप्तयौवनपुत्रं सैवा - कामयतेति कथा ।

इयं द्वापरयुगीना कथा । प्रद्युम्नः रुक्मिणी श्रीकृष्णयोस्सुतः । सप्तमदिनप्रायं कुमारं प्रद्युम्नं कालशम्बरो नाम राक्षसः अपहृत्य स्वभार्यायै मायावत्यै अदाच्च । मायावती तं शिशुं दृष्ट्वा तस्य पूर्वजन्मवृत्तान्तं सस्मार । निटलाक्षस्य परमेश्वरस्य कोपाग्निना दग्धः मन्मथः द्वापरयुगे रुक्मिणीश्रीकृष्णयोस्सुत इवाजनि । एतद्ज्ञात्वा मन्मथस्य भार्या रतिः तं शिशुं रक्षितुं मायावतीति नाम्ना शम्बरमुदवहत् । स्वमहिम्ना अपारामेकां मायावतीं सृष्ट्वा शम्बरं सेवितुं न्ययोजयत् । अधुना एतत्सर्वं स्मृत्वा तच्छिशवे स्तन्यं दातुं नैच्छत् । अन्यथा मायावत्याऽदापयत् । कालगमने प्रद्युम्नः युवाऽभूत् । तं परिणेतुं मायावती ऐच्छत् । किन्तु तां मातरं मत्वा

In Public domain. Digitization: Muthulakshmi Research Academy


प्रद्युम्नः विवाहाय नाङ्गीचकार । सा च सर्वं वृत्तान्तं प्रद्युम्नाय व्यशदयत् । अनन्तरं तयोरुद्वाहस्सम्प्राप्त इति हरिवंशे विष्णुपर्वणि चतुरुत्तरशतादारभ्य अष्टोत्तरशताध्यायपर्यन्तं विद्यते । क्षेमेन्द्रात्पूर्वकवयोऽप्यमुमेवाभिप्रायं प्राकटयन् ।

'' मात्रा स्वस्रा दुहित्रा वा नैकशय्यासनो भवेत् ।
बलवानिन्द्रियग्रामी विद्वांसमपि कर्षति ॥ इति ''

श्लो. ८०. न पुत्रायत्तमैश्वर्यं कार्यमार्यैः कदाचन ।
पुत्रार्पित प्रभुत्वोऽभूत् धृतराष्ट्रस्तृणोपमः ॥

अनुभवज्ञा आर्याः कदापि स्वमैश्वर्यं असमये पुत्रेभ्यः न यच्छेयुः । पुत्राः विज्ञाः विचक्षणयुता वा न वेति ज्ञात्वैव स्वाधिकारं यच्छेयुः यतः अधिकारं प्राप्य ते अविनयवन्तो भूत्वा पितॄन् निर्वासयेयुर्वा, नोचेत् ते एव दुर्व्यसनिनो भूत्वा स्वनाशं वंशनाशं च कुर्युर्वेति वक्तुं न शक्यते । धृतराष्ट्रोऽपि स्वाधिकारं सर्वं पुत्रप्रेम्णा सुयोधनायादात् । यद्यपि धृतराष्ट्रः सिंहासनारूढः, तथापि कार्यनिर्वाहकस्सुयोधन एव । अत एव पितरं धृतराष्ट्रं तृणमिव मत्वा पाण्डवेभ्यो राज्यं नादात् ।

श्लो. ५८. सन्धिं विधाय रिपुणा न निःशङ्कस्सुखी भवेत् ।
सन्धिं कृत्वावधीदिन्द्रो वृत्रं निःशङ्कमानसम् ॥

शत्रुणा सन्धिं कृत्वापि सुखेन जीवितुं न शक्यते । शत्रुः यदाकदाप्यपकुर्यादिति शङ्का पीडयत्येव । वृत्रः इन्द्रेण सन्धिमकरोत् । तथापि वृत्रं इन्द्रः जघान ।

अत्रैका कथा - त्वष्टा इन्द्रायापकर्तुं वृत्रं नामासुरमसृजत् । सोऽपीन्द्रमग्रसत् । एतद् ज्ञात्वा देवा वृत्रमायासयन् । आयासितो वृत्रः व्यजृम्भत इन्द्रः सूक्ष्मरूपं धृत्वा बहिरागच्छत् । किन्तु वृत्रेण युद्धं कर्तुं नाशक्नोत् । सर्वे देवा हरेर्निकटं उपायान्तरं प्रष्टुमगच्छन् । वृत्रेण सह सन्धिरेव मार्ग इत्युक्त्वा, स्वयं साहाय्यं करिष्येत्यवदत् । अमुमेव विषयं देवा वृत्राय न्यवेदयन् । सोऽपि बाडमित्युक्त्वा नियममेकमवोचत् । आर्द्रैर्वा शुष्कै र्वा शिलामयैर्वा काष्ठमयैर्वा वस्तुभिः, अहनि वा रात्रौ वा भूमौ वा मे मृत्युर्न भवेदिति । सर्वे देवा अङ्गीचक्रुः । तदारभ्य इन्द्रवृत्रौ

In Public domain. Digitization Muthulakshmi Research Academy

सुहृदावभवताम् । काले गच्छति सति एकदा सन्ध्यासमये समुद्रतीरे इन्द्रः वृत्रमपश्यत् । झटिति अयमेव वृत्रं हन्तुं समय इति विचिन्त्य इन्द्रः हरि सस्मार । हरिरप्यागत्य इन्द्रस्य वज्रायुधं प्रविवेश । इन्द्रः वृत्रं समुद्रस्य फेने निधायावधीत् । अज्ञः वृत्रः एतत्सर्वं नैव जानाति अतः वैरिणा सन्धिर्न विश्वसनीयः । लोके न कैरपि वैरं कुर्यात् । वैरं कृत्वा निःशङ्कं जीवितुं न शक्यते ।

श्लो. ७९. नोपदेशामृतं प्राप्तं भग्नकुम्भनिभस्त्यजेत् ।
पार्थो विस्मृत गीतार्थः सासूयः कलहेऽभवत् ॥

भाग्यवशान्महात्मनामुपदेशो लभ्यते । तदुपदेशं श्रुत्वाऽपि, अश्रुतवानिव बधिर इव विस्मरेच्चेत् न किमपि प्रयोजनम् । भग्नकुम्भे यथा जलं न तिष्ठति तथैव निरुपयोगो भवति । भारतयुद्धकाले पार्थोप्येवमेवाकरोत् श्रीकृष्णेनोपदिष्टं गीतामृतं सर्वं विस्मृत्य युद्धे सासूयोऽभवदिति, श्रीकृष्णः पुनरनुगीतां श्रावयदिति अश्वमेधपर्वणि विद्यते । इत्थमनेकैरुदाहरणैरनेकाभिर्नीतिभिः क्षेमेन्द्रः जनानुद्धर्तुं प्रारभत। क्षेमेन्द्रस्य चारुचर्यायाः रचनाविशेषाः :-

१. क्षेमेन्द्रस्य कृष्णद्वैपायनव्यासे अमिता भक्तिः अस्ति । अतः स्वयं व्यासदास इति प्राकटयत् । किञ्च सर्वे दृष्टान्ता अधिकाधिकं महाभारतादेवोद्धृताः । " श्रव्या श्रीव्यासदासेन समासेन सतां मता । क्षेमेन्द्रेण विचार्येयं चारुचर्या प्रकाशिता " इति श्री प्रकाशेन्द्रात्मजव्यासदासापराख्य महाकविरिति स्वयं क्षेमेन्द्रेणोक्तं अस्य ग्रन्थान्ते । शतश्लोकपरिमितोऽयं ग्रन्थः । चारुचर्यां शतकमित्यपि वक्तुं शक्यते ।
२. अस्मिन् ग्रन्थे क्वचित् पूर्वार्थे द्वे नीती उत्तरार्धे द्वौ दृष्टन्तौ विद्येते । क्वचित् पूर्वार्धे द्वे नीती उत्तरार्धे एक एव दृष्टान्तः विद्यते । क्वचित् पूर्वार्धे द्वे नीती विद्येते उत्तरार्धे द्वितीयस्यैव दृष्टान्तो विद्यते । क्वचित् पूर्वार्धे विद्यमान द्वयोर्नीत्योस्समान एक एव दृष्टान्तो विद्यते ।

In Public domain. Digitization Muthulakshmi Research Academy


३. अस्मिन् ग्रन्थे सर्वा नीतय एव विद्यन्ते । न कुत्रापि रसो वा अलङ्कारो वा विद्यते । यत्र कुत्रापि एकद्विश्लोकयोः श्लेषालङ्कारः दृश्यते सोऽप्यक्लिष्ट एव ।

४. चारुचर्या नाम साध्वाचरणमित्यर्थः । साध्वाचरणमेव सदाचारः । तदेव धर्माचरणम् । धर्माचरणं नाम श्रुतिस्मृतिषूक्तं सज्जनसेवितं वचः । तत्सर्वैराचरणीयम् ।

अत्र यथाक्रममुदाहरणानि पश्यामः ।

१. न कुर्यात्परदारेच्छां विश्वासं स्त्रीषु वर्जयेत् ।
हतो दशास्यस्सीतार्थे हतः पत्न्या विदूरथः ॥ श्लो १०
अत्र पूर्वार्धे द्वेनीती उत्तरार्धे द्वौ दृष्टान्तौ विद्येते ।

२. ईर्ष्या कलहमूलं हि क्षमा मूलं च सम्पदाम् ।
ईर्ष्यादोषाद्विप्रशापमवाप जनमेजयः ॥ श्लो. १२
अत्र पूर्वार्धे द्वे नीती उत्तरार्धे एक एव दृष्टान्तः ।

३. मातरं पितरं भक्त्या तोषयेन्नप्रकोपयेत् ।
मातृशापेन नागानां सर्पसत्रेऽभवत् क्षयः ॥ श्लो. १६.
अत्रापि पूर्वार्धे द्वे नीती उत्तरार्धे एक एव दृष्टान्तः ।

४. पदाग्निं गां गुरुं देवं न चोच्छिष्टः स्पृशेद्घृतम् ।
दानवानां विनष्टा श्रीः उच्छिष्टस्पृष्टसर्पिषा ॥ श्लो. ८३
अत्र पूर्वार्धे द्वे नीती विद्येते । किन्तु उत्तरार्धे द्वितीयस्यैव दृष्टान्तः विद्यते ।

५. बिभृयाद् बन्धुमधनं मित्रं त्रायेत दुर्गतम् ।
बन्धुमित्रोपजीव्योऽ भूदर्थिकल्पद्रुमो बलिः ॥ श्लो. ९०
अत्र द्वयोर्नीतयो स्समान एक एव दृष्टान्तोऽस्ति ।

६. श्रीलाभसुभगः सत्यसक्तः स्वर्गापवर्गदः ।
जयतात् त्रिजगत्पूज्यः सदाचार इवाच्युतः ॥श्लो. १
अत्र श्लेषालङ्कारः ।

In Public domain. Digitization: Muthulakshmi Research Academy

धर्मः आचारादेव प्रभवति । धर्मस्य प्रभुरच्युतः अतस्सदाचार अच्युतोपम इति मत्वा लोके कीदृशप्रवर्तनया इहापरौ साध्याविति सम्यगुक्तं क्षेमेन्द्रेण ।

कृष्णद्वैपायनव्यासः विश्वश्रेयसे महाभारतं प्रणिनाय । तस्य दास इति स्वयमुक्तत्वात् क्षेमेन्द्रकविरपि स्वकवितासामर्थ्यं विश्वश्रेयसे एव उपयुंक्षेति ज्ञायते । सर्वैरप्यस्मिन् प्रतिपादिता सद्वर्तना श्रोतव्या अनुष्ठेया च । अयं ग्रन्थः सज्ञनसम्मतः । अतः सर्वे निःशङ्का पठन्तु ।

इति शम् ॥

उपयुक्तग्रन्थः

१. क्षेमेन्द्रलघुकाव्यसंग्रहः संस्कृतपरिषद् ,
उस्मानियाविश्वविद्यालयः ,
हैदराबाद् - ५०० ००७ ,
द्वितीय मुद्रणम् - २००९

In Public domain. Digitization Muthulakshmi Research Academy

# ८. क्षेमेन्द्रस्य भारतमञ्जरी

डा.जे.एस्.आर्.ए. प्रसादः

## १. उपोद्घातः

संस्कृतजगति क्षेमेन्द्रस्य विशिष्टं स्थानं वर्तते। अयं महानुभावः एकादशशतके आसीदिति ऐतिहासिकानां विश्वासः । बहुग्रन्थकर्ताऽयं क्षेमेन्द्रः साङ्घिकविडम्बनान् निरस्य तदुपरि नैकान् ग्रन्थान् ग्रथयामास । अतो निश्चयेन क्षेमेन्द्रः आधुनिकसाङ्घिकविडम्बनायाः पितामह इति वक्तुं शक्नुमः । क्षेमेन्द्रः तदानीन्तनसमाजस्य आचारव्यवहारादिषु दृश्यमानं दर्पदम्भादिकं सम्यङ्निरीक्ष्य निर्भयम् अवहेलनां कृत्वा प्राकाशयत् । देशोपदेशः, नर्ममाला, समयमातृकेत्यादिस्वकृतिषु - तान्त्रिकाः, संन्यासिनः, चोराः, वैद्यम्मन्याः, वणिजः, ज्यौतिषज्ञाः, स्वर्णकाराः क्षेमेन्द्रस्य हस्ते उचितं सत्कारमवाप्नुवन् । यतो तत्क्षेत्रविज्ञानं विनैव वैद्यादयः चिकित्सादिनाम्ना धनमार्जयन्ति इति कारणात् । अत एव हास्यात्मकं सुभाषितमेवं श्रूयते -

वैद्यराज नमस्तुभ्यं यमराज सहोदर ।
यमस्तु हरति प्राणान् वैद्यो प्राणधनानि च ॥ इति ॥

किमर्थं दाम्भिकानामुपहासः करणीय इति स्वयं देशोपदेशे क्षेमेन्द्रः कथयति

हासेन लज्जितोऽत्यन्तं न दोषेषु प्रवर्तते ।
जनस्तदुपकाराय ममायं स्वयमुद्यमः ॥ इति ॥

(देशोपदेशः १.४)

सहोदराः कुङ्कुमकेसराणां भवन्ति नूनं कविताविलासाः ।
न शारदादेशमपास्य दृष्टास्तेषां यदन्यत्र मया प्ररोहः ॥

(बिल्हणः)

बहुशास्त्रज्ञः बहुविषयश्चाऽसौ क्षेमेन्द्रः श्रीमद्रामायणं तथा महाभारतमाधारीकृत्य क्रमशः 'रामायणमञ्जरी' एवं ' भारतमञ्जरी ' नाम्ना

In Public domain. Digitization Muthulakshmi Research Academy


ग्रन्थरत्नद्वयमलिखित् । एकलक्षश्लोकपरिमितं महाभारतकथावस्तु तावत्सुलभतया नावगम्यते पर्वोपपर्व - आख्यानोपाख्यानादि क्रमेण, किन्तु क्षेमेन्द्रेण दशसहस्राधिकश्लोकैरेव सम्पूर्णेतिहासचित्रणमकारि । ' नाऽमूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते ' इति रीत्या मूलमहाभारतसूत्रमत्यक्त्वा सुन्दरं स्वशब्दैः काव्यमिदमाविष्कृतम् । सामान्यसंस्कृतं ये जानन्ति तेभ्योऽपि यथा अवगतिस्स्यात् तथा सरलतरशब्दैः भारतमञ्जर्याः लेखनमकरोत् । इतिहासगतविविधरसानामाविष्कारे अपूर्वा प्रतिभा अनेनाविष्कृता । पूर्वानुभूतः कश्चन विषयः कालगमनानुसारं कदाचिदवगमने गभीरः दृश्येत तादृशस्य विषयस्य सरलावबोधन एव ग्रन्थकर्तुः सामर्थ्यं प्रकाशमायाति, येन विषयोऽपि रुचिवर्धकः भविष्यति ।

## २. भारतमञ्जरी

भारतमञ्जर्यां मूलमहाभारतं यथावत् प्रतिबिम्बमानं दृश्यते । ग्रन्थस्यारम्भोऽपि तस्मादभिन्नः । ग्रन्थेऽस्मिन्नाहत्य १०,६६५ श्लोकास्सन्ति । श्लोकसङ्ख्या क्रमशः यथा - आदिपर्वणि - १३९७, सभापर्वणि - ४७४, अरण्यपर्वणि - १९६४, विराटपर्वणि - ४०३, उद्योगपर्वणि - ६७२, भीष्मपर्वणि - ४९७, द्रोणपर्वणि ८०४, कर्णपर्वणि - २१८, शल्यपर्वणि - ७१, गदपर्वणि - १११, सौप्तिकपर्वणि - १०१, स्त्रीपर्वणि - ९१, शान्तिपर्वणि - १८००, अश्वमेधपर्वणि - २१४, आश्रमवासिकपर्वणि - ६९, मौसलपर्वणि - ७१, महाप्रस्थानिकपर्वणि - ३३, स्वर्गपर्वणि - ३४, हरिवंशे - १६४१ । भारतमञ्जर्यामादिमश्लोकः यथा -

समस्तवदनोद्गीतब्रह्मणे ब्रह्मणे नमः ।
नमः प्रजापतिभ्यश्च कृष्णद्वैपायनाय च ॥ इति ॥

प्रत्येकमपि पर्व नारायणं नमस्कृत्य इत्येव आरभते । ज्ञान-भक्ति-कर्मयोगाणां प्रबोधिकां श्रीमद्भगवद्गीतां तथा 'दुग्धं गीतामृतं महदि' ति ख्यातं गीतासारं ९७ श्लोकैरेव क्षेमेन्द्रेण न्यरूपि । श्रीमद्भगवद्गीताऽपि कदाचित् केनचिद्व्याख्यानसाहाय्येनैवावबोद्धुं शक्या (यथा शाङ्कर-रामानुज-माध्वादिभाष्याणां साहाय्येन ।) गभीरवेदान्तविषयाणां प्रतिपादनकारणात् ।

In Public domain. Digitization Muthulakshmi Research Academy



तादृशसंदर्भेषु क्षेमेन्द्रः अनितरसाधारणप्रतिभां प्रदर्शयति । श्रीमद्भगवद्गीतासु प्रथमाध्याये युद्धरङ्गे यदा अर्जुनः स्वजनान् दृष्ट्वा विषण्णोऽभवत् तत्र महर्षिणः पदबन्धः एवं लभ्यते -

एवमुक्त्वाऽर्जुनस्सङ्ख्ये रथोपस्थ उपाविशत् ।
विसृज्य सशरं चापं शोकसंविग्नमानसः ।।इति।।(भ.गी.१.४७)

अनेन अस्मन्मनोफलके अर्जुनस्य स्थितिः रूपं च दुःखसंविग्नमानसः तथा इव चित्रितं भवति । अत्रैव क्षेमेन्द्रः लिखति -

इत्युक्त्वा साश्रुनयनो बीभत्सुः कृपया रथे ।
करादुत्सृज्य गाण्डीवं निषसाद विषादवान् ।। इति ।।

पश्यन्तु, पठितुः मनोरङ्गे सान्दर्भिकं दृश्यमारचयति ननु ? सामान्यतः अश्रुनयनाभ्यां स्थितः अर्जुनः न दरीदृश्यते, चित्रेषु उत चलच्चित्रेषु । अत्र मुख्यविषयः न केवलं व्याकरणबद्धमारचनं किन्तु पठितुः रसास्वादोऽपि ।

चातुर्वर्णिकानां प्रत्येकशः धर्मा उपदिष्टा स्मृत्यादिग्रन्थेषु । ग्रन्थे एकस्मिन् स्थले कस्यचन क्षत्रियस्य धर्मः कीदृक् स्यादिति श्रीकृष्णमुखेन ज्ञापितं - ' तरस्वी क्षत्रियो मानी प्राणैरपि यशःक्रयी ' ति । अत्र क्षत्रियशब्दस्य यदि राजा इत्यर्थः स्वीकृतः तर्हि तादृशस्य राज्ञः दायित्वम्, अभिमानित्वञ्च यशोऽर्थे प्रकटीकृतं भवति । सामान्यार्थेऽपि प्रदत्तविशेषणानामनुसारेण क्षत्रियत्वमेवं स्यादिति द्योत्यते । इदानीन्तनप्रजातन्त्रशासका एतद्विपरीतमाचरन्ति । तेभ्यः अस्य वाक्यस्य शाब्दबोधः कार्यः समेषामुपकाराय ।

स्थितप्रज्ञः क इति अर्जुने पृष्टे सति तदुत्तरं 'सर्वकामपरित्यक्ता, परमार्थदर्शनामृतरसलाभेन अन्यस्मादलंप्रत्ययवान्, एवं स्थिता प्रतिष्ठिता आत्मानात्मविवेकजा प्रज्ञा यस्य सः स्थितप्रज्ञो विद्वानि' ति प्राप्यते शङ्करभाष्ये । अमुमेवांशं क्षेमेन्द्रः ललितैः पदैः ग्रथयति -

गीताशाङ्करभाष्यम् २.५५

ईश्वरादपरो नाहमिति स्वानन्दनिर्भरः ।
निरस्ताखिलसङ्कल्पः स्थितप्रज्ञोऽभिधीयते ।। इति ।।

In Public domain. Digitization Muthulakshmi Research Academy


अनेन क्षेमेन्द्रः अद्वैतसम्प्रदायस्य प्रशंसकः अनुयायी वा इत्यवगम्यते । यथा पूर्वमुक्तं ग्रन्थकर्तुः सामर्थ्यं गभीरविषयस्य ललितप्रतिपादने एव सम्यक् विज्ञायते ।

ज्ञान-कर्म-राज-भक्तियोगेषु कर्मयोगस्यावश्यकता तथा महत्ता च इत्थं प्रतिपाद्यते -

कर्मणैव गताः सिद्धिं जनकप्रमुखादयः पुरा ।
तन्माकार्यान्निवर्तस्व लोकस्त्वामनुवर्तताम् ॥ इति ॥

अर्थात् कर्मयोगेनैव जनकादयः सिद्धार्था अभूवन् इत्येकः विषयः पथिप्रदर्शकः । यदि कर्मणः कार्यनिरतिः स्यात् तर्हि लोकोऽपि मार्गदर्शकाभावं प्राप्नोतीत्यपरः अर्थः । श्रीमद्भगवद्गीतायां यद्यदाचरति श्रेष्ठः इत्यादि श्लोकः अस्य प्रेरणात्मकस्स्यात् । सन्दर्भेऽस्मिन् ऐतिहासिकनायकस्य अर्जुनस्य स्वकर्मणि प्रचोदना तथा तेन अन्येभ्यः स्वकर्मसु प्रेरणेत्यंशद्वयं प्रधानम् । केनाऽपि नायकेन एवं वर्तितव्यं खलु । मन्ये, एतादृशविषयाणां सङ्ग्रहेण प्रतिपादनेन च भगवद्गीता management इति प्रसिद्धस्याधुनिकविषयस्याऽपि प्ररोचिकाऽभवत् । कश्चिन्नेता अथवा काचिन्नेत्री कीदृश उत कीदृशी वा स्यादिति एते management तज्ज्ञाः विविधसर्वकार-स्वायत्तीकृतसंस्थासु leadership skills नाम्ना शिक्षणप्रशिक्षणादिकं ददति । अस्तु, इदानीमत्र कश्चिन्नेता कथं न स्यादिति क्षेमेन्द्रः सूचयति -

ममाऽपि कृतकृत्यस्य कर्मेदं स्थितिरक्षिणः ।
विनश्यन्त्यन्यथा लोको मत्प्रमाणविश्रुङ्खलः ॥ इति ॥

यद्यप्यहं कृतकृत्यः तथाऽपि स्थितिरक्षणार्थं मया कर्म कार्यमेव । यद्यहं कार्यं न कुर्यां, तर्हि इमे लोकाः मां प्रमाणीकृत्य विश्रुङ्खलव्यवहारेण विनश्यन्तीत्यर्थः । अत्रास्माभिरिदमवगन्तव्यं यत् यदि नेतृलक्षणानि अस्मासु स्युः तर्हि निष्कलङ्कवृत्त्या, परिश्रमी भूत्वा, स्वलाभं हित्वा उद्योगः कार्यः मार्गदर्शनं च कार्यम् ।उच्यते च 'उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीरि ति'।

कर्म त्रिविधमिति वयं जानीमः । तत्त्रिविधकर्मपरित्यागं कथं न कार्यमिति सरलं क्षेमेन्द्रः भणति । ' मोहत् नित्यकर्मपरित्यागः तामसः,

In Public domain. Digitization Muthulakshmi Research Academy



क्लेश-दुःख-भयेभ्यः कर्मत्यागः राजसः यश्च निष्फलः, अनासक्त्या कर्म कुर्वतां त्यागः सात्त्विक ' इति । अतः जनकादीनामुदाहरणं स्वीकृत्य कर्म कार्यमेव । निष्फलं कर्म न कुर्वीतेति श्रुतिवाक्येन पूर्वोक्तराजस कर्मापि न कार्यम् । सात्त्विकमेव कर्म कर्मेति गीयते । गीतायामर्जुनं भागवानेवं ब्रवीति - ' निर्द्वन्द्वो नित्यसत्त्वस्थो भवे ' ति । गीताया आधारेण ' अनासक्तियोग ' इति नाम्ना प्रमुख प्रजातन्त्रवादिना महात्मा इति विख्यातेन गान्धी महाशयेन अनासक्त्याश्रमे तिष्ठन् एकः ग्रन्थः व्यरचीति ।

गीतायामेकत्र श्रीकृष्णार्जुनयोस्संवादे युद्धरङ्गे अर्जुनः पृच्छति - ' प्राणी बलादिव वशीकृतः केन प्रेरितः पातकमाचरति '? इति । तस्योत्तरं लभ्यते कामक्रोधावेव पातककारणे इति । कथं कारणे इति सुबोधं वाचयति क्षेमेन्द्रः -

रजोगुणसमुत्थेन हर्षशोकादिदायिना ।
लोकसंहारशीलेन कामेन क्रोधबन्धुना ॥
अहङ्कारेण बलिना घोरेणानेन वैरिणा ।
यस्य तं दुःसहं शत्रुं कामरूप विनाशय ॥ इति ॥

त्रिगुणानां संवेदनशीलत्वेन प्रत्येकमेकैकस्य गुणस्य अन्ययोः आधिक्यात् आहारादिव्यवहारेषु तादृशपरिणामः कथं प्रतिफलति इति गीतायां स्पष्टमुक्तम् । अतो स्वीकृताहरः मनः तथा चेष्टादि च कथं प्रभावयतीति स्पष्टम् । क्रोधेन अहङ्कारेण च अत्यन्तं महातपस्वी सन्नपि दुर्वासाः कथं भक्ताम्बरीषशरणं गत इति पुराणादिद्वारा वयं सम्यक् जानीमः । अतः यः रजोगुणसमुद्भवः, यः संतोषदुःखकारणं, यस्य लोकसंहरणशीलत्वमस्ति, यश्च क्रोधरूप अग्नेः बन्धुरपि भवति तादृशः प्रबलः कामः वैरित्वेन परिगणय्य नाशनीय इति सुबोधकम् ।

एवमेव गीतायां दशमाध्याये स्वात्मविभूतीनां कथनसंदर्भे द्वाविंशतिश्लोकैः यासां प्रदर्शनमकारि, ताः विभूतीः अत्यन्तक्लृप्तरूपेण भारतमञ्जर्यां संप्राप्यन्ते । यथा -

In Public domain. Digitization Muthulakshmi Research Academy


अहं विष्णुरहं सूर्यश्चन्द्रोऽहं मघवानहम् ।
शङ्करोऽहं धनेशश्च वह्निः सुरगुरुस्तथा ।
अक्षरोऽहमहं कालो जयोऽहं भूतिरप्यहम् ।। इति ।।

एतत् क्षेमेन्द्रस्य साहसं सूचयति । यतोहि श्रीव्यासमहर्षिणः हृदयं बह्वल्पैः शब्दैः प्रधानांशमत्यक्त्वा लेखनं दुःशकमेव खलु ।

शान्तिपर्वणि राजधर्माणां प्रतिपादनावसरे मुचुकुन्दोपाख्याने केकयभूपाल नामा राजा केनचित् राक्षसेण गृहतीस्सन् चित्तमेवं प्रशमयति

न भेतव्यं त्वया चित्त ! राष्ट्रे मे नास्ति विप्लवः ।।
नायज्वा न विकर्मस्थो न पापो न कुलच्युतः ।
विद्यते नगरे कश्चित्क्षत्रधर्मे स्थितस्य मे ।।
इति ब्रुवाणं नृपतिं स तत्याज निशाचरः ।। इति ।।

साम्प्रतं प्रजातन्त्रसमाजे श्लोकोक्तऽवगुणाः साङ्घिकदोषाः वा विविधराजकीयदलेषु नरीनृत्यन्ते । स्वपक्षकण्टकोद्धरणं विना एते राजकीयपक्षाः सर्वजनोद्धरणं सर्वजनहितं च कथं वा कुर्युः । पुनश्च श्लोकोक्तकथानुसारं तादृश राजा तथा राक्षसश्च अधुना यदि स्यातां तर्हि राक्षस एव राज्ञा भक्षितो भविष्यतीति उपहासात्मकविषयः न !

एवं पश्यति सति भारतमञ्जर्यां बह्व्यः सूक्तयः, कथाः संप्राप्यन्ते । अत्रैकां सूक्तिं पश्यन्तु ।

विदेशेषु धनं विद्या व्यसनेषु धनं मतिः ।
परलोके धनं धर्मः शीलं तु निखिलं धनम् ।। इति ।।

अद्यतनसमाजः विद्या-बुद्धि-धर्मैस्सह शीलस्यापि यदि प्राधान्यं ददाति तर्हि स्वधर्मः परिपालित एव । अत्र कश्चित् प्रश्चात्त्यः Ralph Waldo Emerson नामा एवं वदति - ' if wealth is lost, nothing is lost; if health is lost, something is lost. But, if character is lost, everything is lost.' अत शीलमेव निखिलं धनमिति ध्वनितम् । सर्पाणां द्विजिह्वता कथं प्राप्ता इत्यस्य समाधानमेवं क्षेमेन्द्रः वक्ति -

सुधां कुशेषु संस्थाप्य स्नातुं यातेषु भोगिषु ।
तार्क्ष्येण प्रागनुज्ञातो जहारेन्द्रोऽथ तां जवात् ।।

In Public domain. Digitization Muthulakshmi Research Academy



वञ्चिता भुजगा दृष्ट्वा सुधालिप्तं कुशासनम् ।
लिलिहुर्दीर्घजिह्वाग्रा येन प्राप्तुर्द्विजिह्वताम् ॥ इति ॥

विषयोऽयं यद्यपि पौराणिकः स्यात् तथाप्यत्र कश्चन वैज्ञानिकांशः स्फुटीभवति ननु ।

अरण्यपर्वणि मर्यादापुरुषोत्तमस्य श्रीरामचन्द्रस्य चरितं प्रस्तावितं भवति । यदा युधिष्ठिरः मार्कण्डेयमहर्षिणं संप्राप्य मत्तः अल्पभाग्यतरः कश्चिन्नरः दृष्टपूर्वः वा विद्यते इति यदा पृच्छति, तदा तस्योत्तररूपेण ' रामोपाख्यान ' नाम्ना ७२८ श्लोकैः महर्षिणा उद्गीरितम् । तदेव क्षेमेन्द्रेण भारतमञ्जर्यां ५१ श्लोकैः सुष्ठु प्रत्यपादि । विदेशविश्वविद्यालयेषु अस्य ग्रन्थस्यैव समानः ग्रन्थः ' रामोदन्तम् ' इति नाम्ना संस्कृताधीयानैः पापठ्यते ।

बौद्धसम्प्रदाये स्वसिद्धान्तनिरूपणार्थं चत्वारः, उपसम्प्रदायास्सन्ति, सौत्रान्तिक-वैभाषिक-योगाचार-माध्यमिकादि क्रमेण । बौद्धाः सर्वशून्यवादिनः । जन्ममृत्यरूपसंसारचक्रात् संपूर्णाविमुक्तिरेव निर्वाणमिति बौद्धाः । किन्तु बौद्धाः वेदप्रामाण्यमनङ्गीकृत्यैवं प्रतिपादयन्ति तेषां निर्वाणशब्दविचारः आस्तिकमतरीत्या क्षेमेन्द्रः एवं प्रतिपादयति –

विषयेन्द्रियसंयोगान्क्षयिनो हर्षशोकदान् ।
सहते यो विलुप्तात्मा निर्वाणं तस्य शाश्वतम् ॥ इति ॥

यतः निर्वाणशब्दस्य शाश्वतिक आनन्दः इत्यपि अर्थः कोशेषु प्राप्यते ।

**उपसंहारः**

एतावत्पर्यन्तं अस्माभिः दृष्टं यत् क्षेमेन्द्रः न केवलं हास्यात्मककृतीः करोति अपि तु धर्मबोधकग्रन्थलेखने अपि सुसमर्थ इति । अस्य महाशयस्य प्रज्ञा अनितरसाध्या । भारतमञ्जर्यां क्षेमेन्द्रस्य योगदानं कीदृशमिति पृष्टे सति उत्तरमेवं दातुं शक्यम् -

– क्षेमेन्द्रः प्रक्षिप्तश्लोकादिकं विना मूलमपरित्यज्य सङ्ग्रहेण महाभारतविषयं प्रत्यपादयत् ।
– यस्य कस्याऽपि पौराणिकग्रन्थस्य संक्षिप्तरूपं (abridged edition) प्रप्रथमं तेनैवाविष्कृतम् ।

In Public domain. Digitization Muthulakshmi Research Academy


संस्कृतकलाशाला, कलिकाता तः १९६३ वर्षे प्रकाशिते Epic Sources of Sanskrit Literature इति ग्रन्थे भारतमञ्जरीविषयकचर्चा अपि द्रष्टुं शक्या । भारतीयसाहित्यसर्वस्वम् इत्यस्मिन् ग्रन्थे श्री अमरेशदत्तः एवमभिप्रैति - Kane's judgement that 'Kshemendra's contribution to poetics is meager' is harsh and does not justice either to Kshemendra or his work - Encyclopedia of Indian Literature, Vol.1, Sahitya Academy, 1987. अतः अस्य वादस्य सत्याऽसत्यविचारणे सङ्गोष्ठीयं महान्तमवकाशमकल्पयदिति मम विश्वासः । एवमेव संपूर्णक्षेमेन्द्रग्रन्थानां पदसूची (concordance) अर्थ-संदर्भसहितं यदि निर्मितं स्यात् तर्हि छात्राणां महते उपकाराय भवेत् ।

इति शम् ॥

**References :**


1. Bharata Manjari, Motilal Banarasi Das, Varanasi 1989
2. Srimadbhagavadgita with Sankara Bhashya, Gita Press, Varanasi, 1990

In Public domain. Digitization Muthulakshmi Research Academy

# ९. क्षेमेन्द्रविरचितचतुर्वर्गसंग्रहस्य धर्मप्रशंसा

डा. विद्यानन्द आर्यः

भारते आदिकालादेव धर्मस्य महन्महत्वं विद्यते। धर्मेण हीनो जनः मनुजः एव न गण्यते अस्यां देवभूमौ। भारतीयजीवनपद्धतौ पुरुषार्थचतुष्टयं मानवेन अवश्यम् आचरणीयं भवति। तत्र धर्मस्य आदिमं स्थानम्। धर्मेण एव सर्वं प्राप्तुं प्रयतितव्यम्, धर्मेणैव वा सर्वं प्राप्यते -

धर्मादर्थः प्रभवति धर्मात् प्रभवते सुखम्।
धर्मेण लभते सर्वं धर्मसारमिदं जगत् ॥[१]

महाभारतसमये प्रजाः राजानश्च धर्मं नाचरन्तीति खिन्नो बादरायणवेदव्यासः सर्वान् तान् धर्मं प्रति प्रेरयन् ऊर्ध्वबाहुः विरौति -

ऊर्ध्वबाहुः विरौम्येष न च कश्चिच्छृणोति माम्।
धर्मादर्थश्च कामश्च स धर्मः किन्न सेव्यते ॥ इति ॥[२]

प्राचीनसंस्कृतसाहित्ये धर्मः विविधरूपेषु परिभाषितः। मुख्यतः धर्मस्य त्रिविधानि लक्षणानि उपलभ्यन्ते - १. कारणसूचकलक्षणम् २. परिणामसूचकलक्षणम् ३. स्वरूपसूचकलक्षणं चेति।[३]

मीमांसादर्शने कथ्यते - चोदनालक्षणो धर्मः इति।[४]

चोदना इति कार्यं प्रति प्रेरयितृ वचनमुच्यते। गुरुः आज्ञापयति - एतत् कर्म कुरु। शिष्यः तत्कर्म करोति। श्रुतिः आदिशति - यज्ञं समाचर यजमानः यजति। शिष्येण यजमानेन च धर्मः पालितः। इह दृष्टान्तद्वयोः धर्मस्य कारणसूचकलक्षणम् अवगन्तुं शक्यते। मीमांसाकारेण धर्मस्य यत् लक्षणं कृतं तस्यायमर्थः - शास्त्रेण यस्य कार्यस्य करणस्य आदेश विहितः सः धर्मरूपः इति। सत्यं वद, धर्मं चर।[५] इत्यादीनि उपनिषद्वचनानि, कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः। इत्यादीनि श्रुतिवचनानि धर्मस्य कारणसूचकलक्षणान्तर्गतान्येव।[६]

In Public domain. Digitization Muthulakshmi Research Academy


वैशेषिकदर्शने उच्यते - यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः इति ।[७]

येन अस्मिन् जीवने अभ्युदयः पारलौकिकजीवने च मोक्षः प्राप्यते स धर्मः इति । अत्र धर्मस्य परिणामसूचकलक्षणं विगद्यते । धर्मेण कीदृशः परिणामः प्राप्यते इति ।

धर्मस्य स्वरूपसूचकलक्षणे अयं श्लोकः परिगणयितुं शक्यते यत्र आत्मनः प्रतिकूलानि परेषां न समाचरेत् इति धर्मस्य स्वरूपम् उच्यते

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥[८]

अत्र प्रदर्शितेषु धर्मलक्षणेषु आदिमलक्षणद्वयस्य आधारः दार्शनिकः वर्तते परन्तु स्वरूपसूचकलक्षणस्य स्वरूपं तु सर्वथा व्यावहारिकं विश्वजनीनं विद्यते । अनया दृष्ट्या एव उच्यते यत् धर्म इति शब्दः सत्कर्मवाचकः कर्तव्यवाचको वा इति ।

भारते उत्पन्नाः समेऽपि आचार्याः ग्रन्थकर्त्तारः शास्त्रकाराः कवयो वा अस्यां पुण्यधरायाम् उत्पन्नत्वात् धर्मेण प्रभाविताः धर्मसम्बद्धाः विविधाः विषयाः निजरचनासु उट्टङ्कितवन्तः । संस्कृतसाहित्यजगति सुप्रसिद्धः क्षेमेन्द्रकविः धर्मसम्बद्धविषये लिखितवत्सु अग्रेसरः । अस्य समुपलभ्यमानासु उपदेशकाव्यानि बहूनि विद्यन्ते । तेषु चतुर्वर्गसंग्रहेत्युपदेशकाव्यमन्यतमम् चतुर्वर्गसंग्रहे धर्मप्रशंसाप्रकरणे महदुपयोगि । अस्मिन् चतुर्वर्गसंग्रहे पूर्वव्याख्यातं धर्मस्य कारणस्वरूपपरिणामसहितं लक्षणत्रयमुपलभ्यते विशिष्टया प्रशंसया सह । अस्मिन् धर्मप्रशंसाप्रकरणे विविधछन्दस्सु निबद्धानि सप्तविंशतिः पद्यानि समुपलभ्यन्ते ।

धर्मप्रशंसाप्रकरणस्य प्रारम्भः मंगलाचरणेन भवति, धर्मः पुण्यभाजां मंगलाय भवतु इति । कीदृशः धर्मः ? इति चेत् उच्यते - सत्यस्कन्धः, तरुणकरुणापूतपीयूषसिक्तः, श्रान्तिच्छायः, शुभमतिलतालंकृतः, शीलमूलः सत्वप्रसवविलसत्पल्लवः प्रोद्यत्कुशलकुसुमः श्रीफलश्चेति ।[९]

एषा धर्मप्रशंसा शिष्याणाम् उपदेशाय मनीषिणां च सन्तोषाय कविना क्रियते । धर्मस्य प्रशंसाम् एवं प्रारभते कविः - धर्मः एव मानवानाम्

In Public domain, Digitization Muthulakshmi Research Academy


इहलोके परलोके च शर्मरूपः, अन्धकारे रविः, सर्वविधापदां प्रशमने क्षमः, सुमनसां धर्माभिधानो निधिः भवति। अबान्धवे पृथुपथे अयं बन्धुः, निश्चलः सुहृत्, संसारोरुमरुस्थले सुरतरुः वर्तते। एवंविधात् धर्मात् कः परः स्यात्? शुभप्राप्तये एषः कश्चन विशिष्टः एव परिकरः, यः कल्पापायपदेऽपि उपप्लवलवैरस्पृष्टवेलाफलः। अस्मिन् स्थिते कर्णे धर्मकथा, मुखे परिचितं धर्माभिरामं वचः, चित्ते धर्ममनोरथः, सर्वत्र प्रणयिनी धर्मस्थितिः काये धर्ममयी क्रिया च भवन्ति।[10]

धर्मरहितं मानवजीवनं सर्वथा हेयम् इति भावयुतं कविहृदयं धर्मरहितमानवान् उद्दिश्य विचारयति - धर्मेण हीनाः मनुष्याः क्लेशमेव भजन्ते। प्रमोहस्थिरतरतमसां मनुष्यत्वहीनं जन्म निन्द्यं गण्यते। बुद्ध्या हीनः शुभफलविकलः मनुष्यः पशूनां तुल्यचेष्टः विचार्यते। पाण्डित्यहीना बुद्धिः सदसतोः तत्वचर्चाविचारे भ्रमति।

शुकसदृशगिरां मानवानां धर्महीनं पाण्डित्यं च निष्फलक्लेशमेव भवति। मदान्धानां परोत्कर्षविनाशनं पाण्डित्यं मात्सर्यपांसुपूरेण मातङ्गस्नानमेवेति मन्तव्यम्। अधर्मात्मा निन्द्यः। यः श्रुतिवर्जितः स एव अन्धः। यः अर्थिनिरर्थकः स एव शठः। यस्य यशः नास्ति स एव मृतः। यस्य च धीः धर्मे नास्ति स एव शोच्यः अस्ति।[11]

अहिंसा परमो धर्मो मतः भारतीयसंस्कृतौ। सर्वत्र शास्त्रेषु पूराणेतिहासेषु वा अहिंसायाः महत्त्वं प्रतिपाद्यते -

अहिंसा परमो धर्मस्तथाहिंसा परंतपः।
अहिंसा परमं सत्यं ततो धर्मः प्रवर्तते॥[12]
अहिंसा परमो धर्मः सर्वप्राणभृतां स्मृतः॥[13]

धर्मप्रशंसाकारः धर्माङ्गानि प्रशंसन् विशेषतः धर्माङ्गभूतायाः अहिंसायाः एव धर्मस्याङ्गभूतानामन्यांशानामपेक्षया अधिकं वर्णनं विहितवान्। लोके परप्राणत्राणप्रणिहितधियां नराणां धर्मजननी, सकलजनताजीवितसुधा एका दया एव विद्यते। इह ज्ञाननयनैः मुनिभिः असामान्यं पुण्यम् उदितम्, तच्च किमिति चेत् - स्वपरकुशलश्लाघ्यसरणिः अहिंसा।[14]

In Public domain. Digitization Muthulakshmi Research Academy


किमर्थमिति चेत् - समस्तजगतां प्राणेभ्यः अधिकं किञ्चित् प्रियं नास्ति। प्राणिनां सर्वाः क्रियाः सततं प्राणानां परिरक्षणाय भवन्ति। अतः यः अहिंसाकारुण्यवान् सुकृती तेषां प्राणानाम् अभयं ददाति, तस्य पुण्यं गणयितुं न शक्यते इति।[१५]

आडम्बरपूर्णधार्मिकक्रियाणां व्यर्थतां प्रदर्श्य धर्मप्रशंसाकारः धर्ममूलं हिंसाविरामं प्रति प्रेरयति - पुण्यार्जने संलग्नानां जनानां तीर्थानि दीर्घाध्वपरिश्रमाणि, क्रतुडम्बराणि बहुव्ययानि, तपांसि च तनुशोषणानि भवन्ति,अतः एतानि विहाय जनानां मतिः हिंसाविरामे रमताम् इति।[१६]

धर्मस्याधारभूतायाः अहिंसायाः पोषकान् इतरान् गुणान् प्रस्तुवन् स्वार्थिनं जनं निन्दति कविः परोपकारसदृशं च गुणं विशेषतः गणयति - यस्य जनस्य वाचि सत्यं, दृशि सर्वाशयाश्वासिनी प्रसादमयता, पाणौ दानविमुक्तिः, मतौ आत्मजननक्लेशान्तचिन्ता, हृदये दया दयिता काये च परार्थोद्यमः सन्ति, भवे स एक एव जीवति परे अजीवा भ्राम्यन्ति। शीलं शीलयतां कुलं कलयतां सद्भावम् अभ्यस्यतां व्याजं वर्जयतां गुणं गणयतां धर्मे धियं बध्नतां क्षान्तिं चिन्तयतां तमः शमयतां तत्वश्रुतिं शृण्वतां सज्जनानां सत्सु अपि बहुषु गुणेषु तेषां परोपकाराभरणं शरीरं कारुण्यपुण्योपचयक्रियाभिः संसारत्वम् उपैति, स त्रिदशाभिवन्द्यः पुंसां वन्द्यः।[१७]

यत् कारुण्यपरोपकारविकलं स्वार्थासक्तमनर्थसार्थसदनं तत् भूभारभूतं वपुः कस्यचित् मास्तु इति।[१८]

धर्माङ्गभूतानां अन्यानां गुणानां धार्मिकाणां च प्रशंसा इत्थमपि क्रियते कविना - संसारे यावन्ति दानानि तपांसि तीर्थानि च सन्ति तेषां सर्वेषां पुण्यम् एकत्र विभाति चेत् तत्पुण्यापेक्षया निःस्पृहत्वम् अधिकं महार्हं गण्यते। संसारे दानतुल्यं अन्यत् धनं नास्ति। सत्यतुल्यम् अन्यत् व्रतं नास्ति। शीलतुल्यम् अन्यत् शुभं क्षान्तितुल्यं च अन्यत् हितं नास्ति। सतां वदनस्य शोभा अदैन्येन अन्तःकरणस्य शोभा निर्लोभतया वचसाम् अयाच्ञया कायस्य शोभा सत्सेव्यतया असेवकत्वेन वा पाणेश्च शोभा अनुत्तानतलत्वेन भासते। अयाचकः श्रेष्ठः उच्यते - कुलीनः मान्यः भवति, कुलजात् अधिकः मान्यः कलावान्,कलावतः विद्वान्, विदुषः

In Public domain. Digitization Muthulakshmi Research Academy


सुशीलः,सुशीलात् धनी धनिनः दाता दातुश्च अयाचकः ।अयाचकः दातुः कीर्तिं जयति ।[१९]

धार्मिकाणां विषयान् क्रियाः वा वर्णयन् तासां फलितानि तासां मूलं च प्रस्तौति कविः - भव्यानां महतां सज्जनानां भूत्यै दानफला लक्ष्मी शमफलं श्रुतं सुरार्चाफलः पाणिः धर्मफला चेष्टा परार्तिहरणक्रीडाफलं जीवितं सत्यफला वाणी जगत्सुखफलस्फीता प्रभावोन्नतिः भवशान्तिचिन्तनफला च धीः भवति । नरः भूरिपुण्यैः एव परद्रविणनिःस्पृहः परकलत्रनिष्कौतुकः परप्रणयवत्सलः परनिकारबद्धक्षमः परस्तुतिविशारदः परगुणापवादोज्झितः परार्तिहरणोद्यतश्च भवति ।[२०]

क्षेमेन्द्रकविना रचितायाः धर्मप्रशंसायाः अध्ययनेन ज्ञायते यत् कविना विहिता धर्मप्रशंसा सर्वथा व्यावहारिकी विश्वजनीना च वर्तते । धर्मस्य मूलरूपा अहिंसा एव मता इह कविना । विचारकाः मनीषिणः प्रबद्धाः धर्मस्य इमं रूपमेव मन्वानाः अवलोक्यन्ते साम्प्रतम् । आधुनिकसंसारे मानवमूल्यानि हीयन्ते भ्रातृत्वभावना नश्यति मानवानां परस्परसौहार्द्रं च क्षीयते । ईदृशसमये धर्मो यदि जनैः आचर्यते, आत्मनः प्रतिकूलानि परेषां न समाचरेत् इत्यादि धर्मं - कर्त्तव्यं आत्मसात् क्रियते चेत् समाजे शान्तिः सौख्यं सौहार्द्रं च सम्भवेयुः । सुखिनः तृप्ताः सन्तोषिणः मानवाः जीवनसाफल्यं प्राप्नुयुः ।

## सन्दर्भसूची -


१. रामायणम् - अरण्यकाण्डम् - ९ । ३०
२. महाभारतम्- १८ । ५ । ४९
३. गंगाप्रसाद उपाध्याय अभिनन्दन ग्रन्थ, धर्म क्या है, क्या नहीं
४. मीमांसादर्शनम् - १ । १ । १
५. तैत्तिरीयोपनिषद् - शिक्षावल्ली
६. यजुर्वेदः - ४० । २

In Public domain. Digitization Muthulakshmi Research Academy

७. वैशेषिकदर्शनम् - १ | १ | २
८. महाभारतम्-
९. चतुर्वर्गसंग्रहः, धर्मप्रशंसा - १
१०. चतुर्वर्गसंग्रहः, धर्मप्रशंसा - ३,४
११. चतुर्वर्गसंग्रहः, धर्मप्रशंसा - ५,६,८
१२. महाभारतम्, अनुशासनपर्व -२२६ | २५
१३. महाभारतम्, आदिपर्व - ११ | १२
१४. चतुर्वर्गसंग्रहः, धर्मप्रशंसा - १२
१५. चतुर्वर्गसंग्रहः, धर्मप्रशंसा - १३
१६. चतुर्वर्गसंग्रहः, धर्मप्रशंसा - २१
१७. चतुर्वर्गसंग्रहः, धर्मप्रशंसा - ११,२०,१६
१८. चतुर्वर्गसंग्रहः, धर्मप्रशंसा - १५
१९. चतुर्वर्गसंग्रहः, धर्मप्रशंसा - २४,१०,२५,२६
२०. चतुर्वर्गसंग्रहः, धर्मप्रशंसा - १९,१७

इति शम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

# १०. क्षेमेन्द्रस्य कविकण्ठाभरण काव्यसारः

डा. पी.टी.जी.वी. रंगाचार्युलु

विश्वसाहित्ये संस्कृतस्य स्थानं अद्वितीयं इति सर्वैरपि उररीकृतमेव वाल्मीकिव्यासभास कालिदासादयः संस्कृतस्य वैशिष्ट्यं सुस्थापितवन्तः इत्यत्र नास्ति संशयलेशः । तत्रापि अलङ्कारशास्त्रे क्रीस्तोः अनन्तरं दशमएकादशशताब्दौ विशिष्टतमौ इति वक्तुं शक्यते । तत्काले एव बहवः अलङ्कारग्रन्थाः काश्मीरदेशात् मालवदेशात् च प्रकाशिताः इति तु सत्यदूर विषयः न। अभिनवगुप्त, मम्मट, कुन्तक, महिमभट्ट धनिक, धनञ्जय, हलायुध भोजादयः तेष्वन्यतमाः । बहुग्रन्थकर्ता क्षेमेन्द्रः तेष्वन्तर्भूतः ।

तेषु अधुना वयं क्षेमेन्द्रविरचित कविकण्ठाभरणविषयमधिकृत्य प्रस्तुमः । :-

कविकण्ठाभरणे पञ्चविभागाः विद्यन्ते । एकैकस्य विभागस्य सन्धि इति नाम चकार क्षेमेन्द्रः ।

कवित्वप्राप्तिः , शिक्षाकथनम् , चमत्कारकथनम् , गुणदोष विभागः, परिचयप्राप्तिः इति तेषां विभागानां नामानि ।

श्लो. तत्राकवेः कवित्वाप्तिः, शिक्षा प्राप्तगिरः कवेः ।
चमत्कारश्च शिक्षाप्तौ , गुणदोषोद्गतिस्तः ॥
पश्चात् परिचयप्राप्तिः इत्येते पञ्चसन्धयः ॥ (क.फ. १-३)

अत्र अकविः नाम कवित्वअज्ञाता, अर्थात् कवित्वं वक्तुं इच्छति । तस्य शक्तिः नास्ति । तदर्थं किं करणीयमिति चेत् कवित्वशक्तिसंपादनं करणीयम् । कथमागच्छति शक्तिः ? देवताप्रसादात्, अथ वा महापुरुषप्रसादात् वा । तदनन्तरं स्वीयप्रयत्नः । ततः द्वितीय सोपानम् शिक्षाकथनम् , अनन्तरं चमत्कारं आवश्यकं किल , जगन्नाथोक्तरीत्या - चमत्कारजनकभावनाविषयअर्थप्रतिपादकशब्दत्वं किल काव्यम् भवति ।

In Public domain. Digitization Muthulakshmi Research Academy


अतः तृतीयसोपाने चमत्कारसम्पादनम् । ततः गुण दोषविवरणम् - तत्पश्चात् पूर्वपरिचयः - इति पञ्च सन्धयः कल्पिताः क्षेमेन्द्रेण ।

१. तत्र प्रथमविभागे कवित्वप्राप्तिनामके ....

कवित्वशक्तिसम्पादनार्थं देवतानुग्रहपुरुषप्रयत्नादयः उपायाः निरूपिताः ।

प्रथमं हि तावत् दिव्यः प्रयत्नः - तदर्थं देवता उपासनादिकं दिव्यः प्रयत्नः भवति -

तत्र '' ओं स्वस्त्यङ्कं स्तुमः सिद्धमन्तराद्यमितीप्सितम् '' ....
इत्यारभ्य चतुर्षु श्लोकेषु मन्त्रासाधनप्रयत्नः सूचितः ।
ततः पौरुषम् - अनन्तरं पुरुषप्रयत्नः आवश्यकः ।
स्वगुरोः सकाशं गत्वा तस्य शुश्रूषया कवित्वसंपादनम् ।
गुरुशुश्रूषया विद्या इति किल आर्योक्तिः ।

श्लो. कुर्वीत साहित्यविदः सकाशे, श्रुतार्जनं काव्यसमुद्भवाय ।
न तार्किकं केवलशाब्दिकं वा,कुर्याद्गुरुं सूक्तिविकासविघ्नम् ।।

साहित्यविदः सकाशं गत्वा अध्ययनं करणीयम् । न तु व्याकरणविदः सकाशं, न वा तार्किकविदः सकाशम् । उभावपि साहित्य विमुखौ एव सूचयति कविः । अत्रैव —

श्लो. नैव व्याकरणज्ञमेति पितरं, न भ्रातरं तार्किकम् ,
दूरात्संकुचितैव गच्छति पुरः, चण्डालवत् छान्दसम् ।
मीमांसानिपुणं नपुंसकमिति ज्ञात्वा निरस्तादरा ,
काव्यालंकरणज्ञमेव कविता कन्या वृणीते स्वयम् ।।

इत्ययं श्लोकः श्रुतिपथमागच्छति ।
प्रारंभदशायां महाकवीनां श्लोकेषु द्वित्रीपदानां स्थाने,
अन्यानि स्वीयानि पदानि संयुज्य श्लोकपूरणं करणीयम् ।
तेषु पदेषु अर्थः अस्ति वा न वा इति न चिन्तनीयम् ।
केवलं पदपूरणं भवतु इत्येव चिन्तनीयम् । तदा प्रारंभे
एव छन्दो नियमानुसारं श्लोकनिर्माणं आगच्छति इति

In Public domain. Digitization Muthulakshmi Research Academy



उक्तवान् क्षेमेन्द्र :- उदाहरणार्थम् -
महाकविकालिदासस्य –

श्लो. वागर्थाविव संपृक्तौ - वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे - पार्वतीपरमेश्वरौ ॥

इति श्लोकं स्वीकृत्य – अमुं श्लोकमरचयत्

श्लो. वागर्थाविव संपृक्तौ - वाच्यार्थप्रतिपत्तये ।
जगतो जनकौ वन्दे - शर्वाणी शशिशेखरौ ॥

अत्र प्रथमार्थे - वागर्थप्रतिपत्तये इति स्थाने - वाच्यार्थ प्रतिपत्तये इति परिवर्तनं - तृतीयचरणे '' जगतः पितरौ वन्दे '' इति स्थाने '' जगतः जनकौ वन्दे '' इति परिवर्तनं - चतुर्थ पादे पार्वती परमेश्वरौ इति स्थाने शर्वाणीशशिशेखरौ इति परिवर्तनं अकरोत् इति ।

२. शिक्षाकथनं नाम द्वितीयसंधौ - कवीनां भेदाः प्रोक्ताः ।

श्लो. छायोपजीवी, पदकोपजीवी, पादोपजीवी, सकलोपजीवी ।
भवेदथ प्राप्तकवित्वजीवी, स्वोन्मेषतो वा भुवनोपजीव्यः ॥

इति कवीनां भेदाः सूचिताः ।

अत्रैव ....

श्लो. कविरनुहरति छायां, पदमेकं, पादमेकं अर्थं वा ।
सर्वप्रबन्धहर्ते साहसकर्त्रे नमस्तस्मै ॥

इति स्मृतिपथमागच्छति ।

तत्र छायोपजीवी नाम : - पूर्वकवीनां कवित्वच्छायाः स्वीकृत्य कवित्वं यः वदति सः । यथा :-

श्लो. नन्वाश्रयस्थितिरियं तवकालकूट,
केनोत्तरोत्तरविशिष्टपदोपविष्टा ।
प्रागर्णवस्य हृदये, वृषलक्ष्मणोऽथ,
कण्ठेऽधुना वससि वाचि पुनः खलानाम् ॥

इति भट्टलोल्लटस्य श्लोके विद्यमानभावच्छायां स्वीकृत्य उत्पलराजदेवः:-

श्लो. मात्सर्यतीव्रतिमिरावृतदृष्टयो ये,
ते कस्य नाम न खला व्यथयन्ति चेतः ।

In Public domain. Digitization Muthulakshmi Research Academy



मन्ये विमुच्य गलकन्दरमिन्दुमौले:,
येषां सदा वचसि वल्गति कालकूट: ॥ इति श्लोकं अरचयत् ।

२. **द्वितीयः पदकोपजीवी** :- नाम पूर्वकवीनां श्लोकेषु विद्यमानपदानि द्वित्राणि स्वीकृत्य कवित्वं वदति । यथा मुक्ताकणस्य –

श्लो. यथा रन्ध्रं व्योम्नः चलजलदधूमः स्थगयति,
स्फुलिङ्गानां रूपं दधति च यथा कीटमणयः ।
यथा विद्युज्वालोल्लसनपरिपिङ्गाश्च ककुभः,
तथा मन्ये लग्नः पथिक तरुखण्डे स्मरदवः ॥

श्लोके विद्यमानानि, यथा, तथा मन्ये, इत्यादि पदानि स्वीकृत्य तस्य सोदरः चक्रपालः :-

श्लो. सरस्यामेतस्यां उदरबलिवीची विलुलितं,
यथा लावण्याम्भोजघनपुलिनोल्लंघनकरम् ।
यथा लक्ष्यच्छायं चलनयनमीनप्यतिकरः,
तथा मन्ये मग्नः प्रकर कुचकुम्भः स्मरगजः,
इमं श्लोकं प्रोवाच । अयं पदकोपजीवी भवति ॥

३. **पादोपजीवी नाम** :- पूर्वकवीनां श्लोकेषु विद्यमानं एकं पादं यथातथं स्वीयश्लोके स्थापयति ।

श्लो. गन्तव्यं यदि नाम निश्चितमहो गन्तासि केयं त्वरा,
द्वित्राण्येव दिनानि तिष्ठतु भवान् पश्यामि यावन्मुखम् ।
संसारे घटिका प्रणालविगल द्वारा न मे जीविते,
को जानाति पुनस्त्वया सह मम स्याद्वा न वा संगमः ॥

इति अमरुक कवेः श्रलोके विद्यमानं अन्तिमपादं क्षेमेन्द्रः स्वीय '' हं हों स्निग्ध सखे विवेकबहुभिः प्राप्तोऽसि पुण्यैर्मया '' इति श्लोके ''को जानाति पुनस्त्वया सह मम स्याद्वा न वा संगमः '' इति यथातथं स्वीकृतवान् । अयं पादोपजीवी भवति ।

४. **सकलोपजीवी** :- पूर्वकवीनां श्लोकेषु विद्यमानानि कानिचन पदानि अर्थच्छायां अपि स्वीकृत्य श्लोकं लिखति । यथाः आर्यभट्टस्य श्लोके -

श्लो. शब्दैर्निसर्गकटुभिः मलिनस्वभावा:,

In Public domain. Digitization Muthulakshmi Research Academy



श्रोत्रं खला निगडवत् परितस्तुदन्ति ।
श्रव्यै रलुप्तपदबन्धतयातिमञ्जु,
मञ्जीरवत् तु सुजना जनयन्ति मोदम् ॥

इत्यस्मिन् विद्यमान कटु, तुदन्ति, खला इत्यादि पदानि, अर्थच्छायां च स्वीकृत्य स्वीयकादम्बरी ग्रन्थे –

श्लो. कटुक्कणन्तो मलदायकाः खलाः,
तुदन्त्यलं बन्धनश्रुङ्खला इव ।
मनस्तु साधुध्वनिभिः पदे पदे,
हरन्ति सन्तो मणिनूपुरा इव ॥

इति लिखितवान् अयं सकलोपजीवी भवति ।

५. <u>**भुवनोपजीवी यथा**</u> :- पूर्वकवीनां श्लोकं यथातथं उक्त्वा सः इत्थं उक्तवान् इति कथनं भवति । भगवान् व्यासः इत्थं कथयति - इति वदन् - महाभारते विद्यमानं श्लोकं '' इदं कविवरैः सर्वैः '' इत्यादिकं यथातथं वदति एकः कविः । चमत्कारकथनं नाम तृतीयसंधौ - चमत्कार प्राधान्यं उक्त्वा - दशविधचमत्कारान् विशदीकरोति ।

श्लो. एकेन केनचिदनर्घमणि प्रभेण,
काव्यं चमत्कृतिपदेन विना सुवर्णम् ।
निर्दोषलेशमपि रोहति कस्य चित्ते,
लावण्यहीनमिव यौवनमङ्गनानाम् ॥

इति वदन् तत्र अविचारितरमणीयः, विचार्यमाणरमणीयः, समस्त सूक्तव्यापी सूक्तैकदेश दृश्यः, शब्दगतः, अर्थगतः, शब्दार्थगतः, अलङ्कारगतः, रसगतः, प्रख्यातवृत्तिगतः, इति दशविधचमत्कारान् दर्शयति ।

(१) **तत्र अविचारितरमणीयं नाम** - श्लोकः आपातमधुरः भवति । अन्ततो गत्वा विचारयामश्चेत् तत्र रमणीयत्वं किमपि न दृश्यते ।

श्लो. शूराः सन्ति सहस्रशः सुचरितैः पूर्णं जगत् पण्डितैः,

इत्यादि श्लोके दर्शनेन रमणीयत्वं भाति ।

किन्तु अन्ततो गत्वा विचारयामश्चेत् '' भूलोके त्यागशीलाः दुर्लभाः '' इत्येव अर्थः प्रतिभाति । अत्र रमणीयत्वं किमपि नास्ति ।

In Public domain. Digitization Muthulakshmi Research Academy



(२) **विचार्यमाणरमणीयः** :- श्लोकः, दर्शनार्थं समान्य इत्येव भाति किन्तु अन्ततो गत्वा विचारयामश्चेत् तत्र रमणीयत्वं विशेषतया दृश्यते।

श्लो. अङ्गेऽनङ्ग ज्वर हुतवहश्चक्षुषि ध्यानमुद्रा,
कण्ठे जीवः करकिसलये दीर्घशायी कपोलः ।
अंसे वीणा कुचपरिसरे चन्दनं वाचि मौनं,
तस्याः सर्वं स्थितमिति न तु त्वां विना क्वापि चेतः ॥

अत्र विचार्यमाणे सति रमणीयत्वमापतति ॥

(३) इत्थमेव श्लोके सर्वत्र चमत्कारत्वमस्तिचेत् तत् समस्तसूक्तव्यापी भवति ।

(४) श्लोके एकत्रैव चमत्कारत्वं भवति चेत् सूक्तैकदेशरमणीयत्वं भवति । '' नित्यार्चा हृदयस्थितस्य भवतः इत्यस्मिन् श्लोके जीवविमुक्ति '' इति एकस्मिन् पदे एव रमणीयत्वम् । अन्येषामपि चमत्काराणां उदाहरणानि द्रष्टुं शक्यते ।

तथैव शब्दगत (५) अर्थगत (६) शब्दार्थगत (७) अलंकारगत (८) रसगत (९) प्रख्यातवृत्तिगत (१०) इति दशप्रभेदाः सन्ति ।

४. गुणदोषविभागो नाम चतुर्थसन्धौ – शब्दवैमल्यं, अर्थवैमल्यं, रसवैमल्यं इति त्रयः काव्यगुणाः, । काव्यदोषाः, सगुणः, निर्गुणः, शब्दकालुष्यम् अर्थकालुष्यं, रसकालुष्यमिति, कव्यदोषाः, सदोष, निर्दोष, सगुणदोष इति पञ्च, आहत्य दश भेदाः सूचिताः ।

५. परिचयप्राप्तिर्नाम पञ्चमसंधौ : –

कवेः, तर्क व्याकरण, भरत, चाणक्य, वात्स्यायन, भारत, रामायण, मोक्षोपायात्मज्ञान, धातुवादरत्नपरीक्षा, वैद्यक, ज्योतिष, धनुर्वेद गज तुरग पुरुषलक्षण, द्यूतेन्द्रजाल, प्रकीर्णेषु, परिचयः आवश्यकः इति सूचयति । तदा एव कविः कविसम्राट् भवति इति क्षेमेन्द्रः कविकण्ठाभरणे प्रोवाच । तस्मात् कविकण्ठाभरणपठनेन सामान्यमानवोऽपि महाकविः भविष्यति इत्यत्र नास्ति संशयलेशः ।

इति शम्

उपयुक्तग्रन्थः : १. क्षेमेन्द्रलघुकाव्यसंग्रहः संस्कृतपरिषद् , उस्मानियाविश्वविद्यालयः, हैदराबाद् - ५०० ००७ , द्वितीय मुद्रणम् - २००९

In Public domain. Digitization Muthulakshmi Research Academy

# ११. चारुचर्यायाः चारुता

डा. जोषी सन्तोषकुमारः

श्रीलाभसुभगः सत्यसक्तः स्वर्गापवर्गदः ।
जयतात् त्रिजगत्पूज्यः सदाचार इवाच्युतः ॥ चारु १

ग्रन्थेस्मिन् प्रथमश्लोके सदाचारवन्दनमाचरितं महाकविना क्षेमेन्द्रेण । श्लोकेस्मिन् सदाचार अच्युतयोः तुलना विद्यते । यथा भगवदाराधनया सेवनेन च मानवः स्वर्गं मोक्षं च प्राप्नोति तथैव सदाचारतत्परोऽपि स्वर्गं मोक्षं च आप्नोत्येव ।

यः भगवद्भक्तः भवति सः अवश्यं सदाचारतत्परः भवति । यः सदाचारतत्परः भवति सः भगवद्भक्तः भवति । अत एव कविना अनयोः तुलना कृता ।

संस्कृतसाहित्यसाहित्ये क्षेमेन्द्रस्य महत्वस्थानं वरीवर्ति । अनेन विरचितेषु उपदेशात्मकग्रन्थेषु चारुचर्याग्रन्थः अन्यतमः । ग्रन्थेऽस्मिन् (१००)शतम् श्लोकाः विद्यन्ते । सर्वेश्लोकाः अपि अनुष्टुप् छन्दसि वर्तन्ते ।

को नाम सदाचारः किं तत्स्वरूपं कथं वा साध्यश्च इत्याद्यांशंकानां इदं समाधानं वक्तुं शक्यते । आचर्यत इति आचारः सतां आचारः सदाचारः इति कथ्यते ।

साधवः क्षीणदोषाः स्युः सच्छब्दः साधुवाचकः ।
तेषामाचरणं यत्तु सदाचारः स उच्यते ॥

सज्जनाः यथैवाचरन्ति व्यवहरन्ति च तद्वदाचरणम् सदाचारः इति प्रोच्यते । सदाचारे सर्वेषां सद्गुणानामेव समावेशोऽभीष्यते । तत्र च प्राधान्येन जितेन्द्रियत्वं संयमः दमः वागादिनिग्रहः सत्याहिंसासत्कर्मप्रवृत्तिः दुरितनिवृत्तिश्च प्रशस्यते ।

सदाचाराचरणद्वारा जायमाना लाभाः -

आचारल्लभते आयुः आचारादीप्सिताः प्रजाः ।
आचाराध्दनमक्षय्यम् आचारोहन्त्यलक्षणम् ॥

In Public domain. Digitization Muthulakshmi Research Academy



इत्येवं प्रकारेण सदाचारवैशिष्ट्यं बहुधा बहुभिः निरूपितम् ।

चारुचर्या इत्यस्य शब्दस्य व्यत्पत्तिः अमरकोशोक्तदिशा एवं वक्तुं शक्यते ।

सुन्दरं रुचिरं चारु सुषमं साधुशोभनम् । (अमरकोशः ३-५२)
चरति मनोऽस्मिन्निति चरगति भक्षणयोः
चरणं चर्या चरगति भक्षणयोः । (अमरकोशः २-३५)

अर्थात् मनः पूर्वक साधुकार्याचरणमेव चारुचर्या भवति । तादृश चारुचर्यया सुव्यवस्थित जीवनेन साकं मानवस्य मुख्यं लक्ष्यं स्वर्गप्राप्तिः अपि च मोक्षं च सिध्यति ।

संस्कृतवाङ्मये चारुचर्यानाम्ना ग्रन्थत्रयं उपलभ्यते । एकः धन्वन्तरिविरचितः, द्वितीयः क्षेमेन्द्रविरचितः, तृतीयस्तु भोजराज विरचितः । ग्रन्थत्रयेऽपि सदाचारस्यैव प्राधान्यता निरूपिता । एषु त्रिषु ग्रन्थेषु क्षेमेन्द्रस्य विलक्षणता तावत् । ऐतिहासिकसम्बध्दकथायोजनापूर्वकं नियमप्रकल्पनम् ।

**क्षेमेन्द्र ग्रन्थाः**

क्षेमेन्द्रेण नैके ग्रन्थाः विरचिताः । ते च त्रिधा विभक्ताः । (१) पद्यात्मक सूक्ष्मरूपान्तरग्रन्थाः (२) उपदेशात्मकग्रन्थाः (३) शास्त्रग्रन्थाः इति एतेषु उपदेशात्मकग्रन्थाः सप्त विद्यन्ते । चारुचर्या सेव्यसेवकोपदेशः दर्पदलनम् चतुर्वर्गसंग्रहः एषु चतुर्षु ग्रन्थेषु उपदेशः साक्षात् विहितः ।

कलाविलासः, सेव्यसेवकोपदेशः, नर्ममाला एषु त्रिषु ग्रन्थेषु उपदेशः व्यंग्यरूपेण अप्रत्यक्षरूपेण च कृतः कविना । क्षेमेन्द्रेण चारुचर्यायां उपदिष्टाः श्लोकाः आचारनियमाः, गुणाः, दोषाः, विधयः, निषेधाः, व्यसनानि, इति विभागं कर्तुं शक्यंते । एते सर्वेऽपि ऐतिहसिककथाप्रसंगपूर्वकम् विद्यन्ते ।

In Public domain. Digitization Muthulakshmi Research Academy



**नियमाः**

धर्मार्थकाममोक्षाणां शरीरं साधनञ्च यत् ।
महता तत् प्रयत्नेन शरीरमिह पालयेत् ॥

इत्युक्तप्रकारेण मानवेन धर्मार्थकाममोक्षसाधनभूतम् शरीरं अवश्यं प्रयत्नेन रक्षयेत्, कालिदासमहाकविरपि शरीरमाद्यं धर्मसाधनं इत्यवोचत् । एतैः प्रमाणैः ज्ञायते शरीरस्य रक्षायै केचननियमाः अवश्यं पालनीयाः मानवेन । तदर्थमेव क्षेमेन्द्रेन ग्रन्थेऽस्मिन् नियमाः एवं प्रोक्ताः ।

ब्राह्मीमुहूर्ते एव उत्थाय, स्नानेन पवित्रः भवेत् मानवः इति नियमं उक्त्वा पूर्वं इन्द्रः वृत्रासुरनामकं राक्षसं हत्वा स्नानेन पवित्रः अभवत् इति ऐतिहासिकां कथां प्रावोचत् कविः । चारुचर्य २,३

तथैव ईश्वराराधनामहत्वं उट्टंकयन् कविः मानवः यस्य कस्यापि कार्यारम्भे ईश्वरं समभ्यर्चयेत् यतः ईश्वरं संप्रार्थ्यैव श्वेतः यमात् रक्षितः इति अवदत् ।

न कुर्वीत क्रियां काञ्चिदनभ्यर्च्य महेश्वरम् ।
ईशार्चनरतं श्वेतं नाभूत् नेतुं यमः क्षमः ॥ चारु ४

शास्त्रोक्तविधिमनुसृत्यैव श्राध्दं श्रध्दापूर्वकं मानवेन कार्यम् । किन्तु तद्विधानं विस्मृत्य शन्तनुमहाराजः पिण्डग्रहणाय स्वहस्तं भीष्माय अप्रसारत् किन्तु भीष्मः शास्त्रोक्तविधिमनुसृत्य पिण्डं भुविं एव अस्थापयत् ।

श्राध्दं श्रध्दान्वितं कुर्यात् शास्त्रोक्तेनैव वर्त्मना ।
भुवि पिण्डं ददौ विद्वान् भीष्मः पाणौ न शंतनोः ॥ चारु ५

तथैव मानवः सुधौतचरणः शुचिस्सन् जपहोमार्चनं कुर्यात् । यतः पादशौचविहीनं नलं कलिः प्रविवेश । अशुचिः बाह्याभ्यन्तररूपेणापि हानिं जनयति अस्य दृष्टान्तभूत नलः एव इति कविः महाभारतस्य नलकथां प्रादर्शयत् । (महाभारतं वनपर्वं ५९ अध्यायः)

जपहोमार्चनं कुर्यात् सुधौतचरणः शचिः ।
पादशौचविहीनं हि प्रविवेश नलं कलिः ॥ चारु ८

In Public domain. Digitization Muthulakshmi Research Academy



## गुणाः

भगवद्गीतायां गीताचार्येण गुणाः दैवीगुणाः आसुरीगुणाः इति द्विधा प्रोक्ताः । दैवीगुणसम्पन्नः मानवः एव मनुष्यशब्दवाच्यः भवति । एतद्भिन्नः राक्षस एव ।

ग्रन्थेऽस्मिन् क्षेमेन्द्रेण एते गुणाः सम्यक् निरूपिताः ।

क्लेशदशायामपि हरिश्चन्द्रेण धर्ममर्यादां न त्यक्तः ॥चारु ९

तथैव सत्यव्रतमपि सदा मानवेन समाचारणीयमिति भ्रुवन् कविः सत्यानिष्ठातत्परः धर्मराजः शत्रुविजयाय युध्दभूमौ असत्यं उक्त्वा मरणानन्तरं नरकदर्शनम् प्राप्तवानिवति इति महाभारतकथां दृष्टान्तेन दर्शितवान् ।

न सत्यव्रतभङ्गेन कार्यं धीमान् प्रसाधयेत् ।
ददर्श नरकक्लेशं सत्यनाशात् युधिष्ठिरः ॥ चारु १४

दानं मानवेन प्रतिफलापेक्षराहित्येन करणीयम् । यतः कर्णः इन्द्राय कवचकुण्डलान् दानं दत्वा तस्मात् प्रतिफलरूपेण शक्तिनामकं आयुधं स्वीकृत्य कलङ्कितः अभवत् । इयं कथा महाभारते विद्यते ।

त्यागे सत्त्वनिधिः कुर्यात् न प्रत्युपकृतिस्पृहाम् ।
कर्णः कुण्डलदानेऽभूत् कलुषः शक्तियाच्ञया ॥ चारु २९

## असुरगुणाः

गीताचार्येण आसुरीगुणाः एवं प्रोक्ताः ।

दम्बो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम् ॥

क्षेमेन्द्रेण ग्रन्थेऽस्मिन् आसुरीगुणाः एवं निरूपिताः । ईर्ष्याकलहस्य मूलकारणम्, संपदाम् मूलम् क्षमा ईर्ष्याद्वेषात् जनमेजयः विप्रशापं अवाप । इयं गाथा महाभारते अरण्यपर्वणि विद्यते । चारुचर्या १२

वियोगदुःखेषु मानवेन धैर्यं न त्याज्यम् ।
अश्वत्थाम मरणवार्ता श्रुत्वा द्रोणः धैर्यत्यागेन स्वयं हतः ।
कुर्यात् वियोगदुःखेषु धैर्यमुत्सृज्य दीनताम् ।
अश्वत्थाम वधं श्रुत्वा द्रोणो गतधृतिर्हतः ॥ चारु ४०

In Public domain. Digitization Muthulakshmi Research Academy



तथैव क्रोधः अपि मानवस्य शरीरस्य प्रथमरिपुः भवति । तेन अनेके अनर्थाः संभवन्ति । भीमः राक्षस एव शतॄन् हत्वा रक्तं पपौ । क्रोधाविष्ट जनः राक्षसायते अतः मानवेन क्रोधं सर्वदा त्याज्यम् ।

न क्रोधायुतधानस्य धीमान् गच्छेदधीनताम् ।
पपौ राक्षसवत् भीमः क्षतजं रिपुवक्षसः ॥ चारु ४१

वाक्पारुष्यं मानवस्य सर्वसंक्षयकारकं भवति । भीमः क्रोधेन शरतुल्यान् तीक्ष्णान् वाक्यान् प्रयुज्य कुरुकुलक्षयस्य कारणभूतः अभवत् । तथैव क्रोधाविष्टवचसा शिशुपालोऽपि कृष्णेन हतः । अतः वाक्पारुष्यं अनर्थदायकं भवतीति इमे कथे बोधयतः । चारुचर्या ३४

इन्द्रियचापल्यं इन्द्रिलोलत्वं मानवस्य उन्नतस्थितिमवाप्तुं अवरोधकः भवति । तपस्सम्पन्नः विश्वामित्रः इन्द्रदौर्बल्यात् संसारलम्पटो अभवत् । एवं प्रकारेण गुणाः क्षेमेन्द्रेण चारुचर्यायां निरूपिताः ।

## विधिकार्याणि

परोपकारमेव पुण्यमिति कथ्यते । अतः मनसा वचसा कर्मणा मानवेन यत्नेन तत्साध्यः। बुध्दः एव विषयेऽस्मिन् अस्माकं आदर्शपुरुषः ।

तथैव बहुविधविद्याः बहुविधकलाः अवश्यं मानवेन अध्येतव्याः यतः ताः विद्याकलाः आपत्कालोपयुक्ताः भवन्ति । नृत्यकलाकुशलः किरीटी तथा कलया विराटमहाराजस्य आस्थाने स्थानं अवाप्तवान् । (म.भा.विराट.११-२-९)

आपत्कालोपयुक्तासु कलासु स्यात् कृतश्रमः ।
नृत्तवृत्तिर्विराटस्य किरीटी भवनेऽभवत् ॥ चारु ७२

मातृदेवो भव पितृदेवो भव आचार्य देवो भव इति वेदोपदेशः । गुरुं सर्वदा भक्त्या आराधयेत् । रामस्य भक्त्या सन्तुष्टः विश्वामित्रः तस्मै अस्त्रमण्डलम् प्रादात् ।

गुरुमाराधयेत् भक्त्या विद्याविनयसाधनम् ।
रामाय प्रददौ तुष्टो विश्वमित्रोऽस्त्रमण्डलम् ॥ चारु ६७

एवं प्रकारेण चारुचर्यायां विधिकार्याणि निरूपितानि ।

In Public domain. Digitization Muthulakshmi Research Academy



## निषिध्दकार्याणि

निषिध्दकार्यानि मानवेन सर्वदा यत्नेन त्यक्तव्यानि । यतः वेदस्मृतिशास्त्रनिषिध्द कर्माचरणेन मानवस्य सर्वविधभ्रष्टत्वं आपद्यते। अत एव क्षेमेन्द्रेण निषिद्धकार्याणि चारुचर्यायां सम्यक् प्रतिपादितानि ।

यः कोऽपि मानवः अत्युन्नतपदारूढोऽपि पूज्यान् ज्येष्ठान् नैवावमानयेत् । नहुषः इन्द्रपदवीं सम्प्राप्य अगस्त्यावमाननत् पदवीच्युतोऽभवत् ।

अत्युन्नतपदारूढः पूज्यान् नैवावमानयेत् ।
नहुषः शक्ततामेत्य च्युतोऽगस्त्याऽवमाननात् ॥ चारु ५७

तथैव शत्रुणा सन्धिः न कुर्यात् इति, शत्रुभ्यः कार्यं न समर्पनीयम् इत्यादिविषयाः प्रोक्ताः । तथैव कश्चन निषेधः एवमुक्तः ।

पदाग्निं गां गुरुं देवं न चोच्छिष्टः स्पृशेद् धृतम् ।
दानवानां विनष्टाश्रीः उच्छिष्टस्पृष्टसर्पिषाम् ॥ चारु ८५

एवं प्रकारेण निषिध्द कार्याणि बहूनि ऐतिहासिक कथायोजनपूर्वकम् क्षेमेन्द्रः समुपदिदेश ।

## व्यसनानि

व्यसनं मानवपतनाय औन्नत्यनाशनाय च कारणं भवति । परदारेच्छया रावणः, मद्यव्यसनेन यदुवंशीयाः, मृगया व्यसनेन पाण्डुमहाराजः, नाशनं आवाप्नुवन् । चारुचर्या १०,२८

गीतवाद्यादिषु अत्यन्तासक्तिः भोगलालसता व्यसने एव भवतः ताभ्यां व्यसनाभ्यां वत्सदेशाधीशः शत्रुणा हतः । चारुचर्या ७६

एवं प्रकारेण व्यसनानि निरूपितानि ।

## कवेराशयः

साहित्यस्य प्रयोजनेषु अनन्दः एव प्रमुखः भवति । तादृशः आनंन्दः केवलं काव्यपठनेन, श्रवणेन, उत आचरणेन वा भवति इत्याशंका

In Public domain. Digitization Muthulakshmi Research Academy



सहृदयहृदये अवश्यं समुदेति। काव्यानि सामान्यतया वर्णणाप्रधानभूतानि सन्तः एकं महापुरुषचरितोपनिबध्दं भवति। तेन रसानन्दः एकः उपदेशश्च जायते। अयं एकः प्रकारः। परन्तु क्षेमेन्द्र विरचितग्रन्थेषु सर्वेऽपि उपदेशग्रन्थाः आदर्शमयजीवनविधानं आचरणं समुपदिशंति। तेष्वन्यतमः ''चारुचर्या'' मानवः स्वीयजन्मनि कथं साफल्यतां आप्नुयात् इत्ययं विषयः ग्रन्थेऽस्मिन् कविना सम्यक् उपदिष्टम्। यः कोऽपि मानवः स्वपूर्वजानां चरितं विज्ञाय कथं आदर्शमयजीवनं यापनीयं इत्ययं विषयः कविः इतिहासपुराणसम्बध्दानां प्रमुखानां वीराणां, भक्तानां धीरणां च चरितं दृष्टान्तत्वेन दर्शयन् नियमान् असूचयत्। तन्नियमोपेतं जीवनं सर्वदा आदर्शमयं भूत्वा स्वस्य समाजाय च श्रेयसे भवति इत्यत्र न काप्यतिशयोक्तिः।

वृत्तं यत्नेन संरक्षेत् वित्तमेति च याति च।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ॥

इति शम्

उपयुक्तग्रन्थः

१. क्षेमेन्द्रलघुकाव्यसंग्रहः संस्कृतपरिषद्,
उस्मानियाविश्वविद्यालयः,
हैदराबाद् - ५०० ००७,
द्वितीय मुद्रणम् - २००९.

